वासिष्ठगणपतिमुनेः कृतिषु ''पूर्णा'' इति एकमेवासम्पूर्णं गद्यकाव्यम् । परन्तु मुनेः रचनाचातुर्येण, उक्तिवैचित्र्येण, भावगाम्भीर्येण, कृतिकौशलेन

पूर्णेयम् अपूर्णापि स्वयंसम्पूर्णा । पदे पदेऽत्र वाग्वैचित्र्यं, अर्थगाम्भीर्यं, भाववैभवं, कल्पनाकाम्यत्वं च बहुशोऽवलोक्यते । एतत्पठनेन स्पष्टमिदमाभाति यत् गद्यकाव्यनिबन्धने काव्यकण्ठस्य अपूर्वं वैशारद्यम् आसीदिति । गद्यकाव्यस्यास्य साक्षात्सौन्दर्यानुभूत्यै तत्रस्थः कश्चिदंशो-ऽत्रोपस्थाप्यते ।

## गुरोर्जयन्त्युत्सवसन्देशः

स्तब्धेव सर्वतो मौनेन निस्तरङ्गा सभा । तदा देशिको निजममूल्यं सन्देशं मितेनोपन्यासेन सदसे प्रादात् –"वत्साः ! सर्वेषां भुवनानां चालयित्री पराशक्तिः । सा सर्वेभ्यो भुवनेभ्यः परस्ताद्विराजते । भुवनेषु च भ्राजते । भुवनातीतां सदाशिवामाहुः । अत्र दृश्ये तस्याश्चत्वारि शरीराणि । आकाशं प्रथमं शरीरम् । तदुपाधिरीश्वरी । सर्वस्य जगतः सम्राज्ञी । सूर्यमण्डलं द्वितीयं शरीरम् । तदुपाधिर्गायत्री । सवित्री प्राणिनाम् । भूमण्डलं तृतीयं शरीरम् । तदुपाधिर्लक्ष्मीः । धारिणी प्राणिनाम् । चन्द्रमण्डलं चतुर्थं शरीरम् । तदुपाधिः काली । संहारिणी प्राणिनाम् । इत्यधिदैवतम् ।

अथाध्यात्मम् । निर्विकल्पे समाधौ परिशिष्टा शुद्धा चिदेव सदाशिवा । सविकल्पे समाधौ दहराकाशसञ्चारिणी कुण्डलिनीशक्तिरीश्वरी । वाग्गायत्री । मनो लक्ष्मीः । प्राणः काली ।

प्राणस्य गत्यागतिनिरीक्षणेन कालीमुपासीत । तेन सिद्धेन प्राणो ज्योतिर्मयो भवेत् । सङ्कल्पतरङ्गनिरीक्षणेन लक्ष्मीमुपासीत । तेन सिद्धेन मनो धूतसङ्कल्पं भवेत् । सूक्ष्मस्वरानुसन्धानेन गायत्रीमुपासीत । तदानीमाभ्यन्तरः शब्दो ज्योतिर्मयो भवेत् । ध्रुवया स्मृत्येश्वरीमुपासीत । तेन सर्वग्रन्थिमोक्षो भवेत् । सहजया निष्ठया सदाशिवाम् उपासीत । तेनात्मा ब्रह्मभूतोभवेत् । अयं मे शिष्यान्प्रति सन्देशः ।"

## भाष्यकरणे प्रौढत्वम्

कस्यापि शास्त्रीयग्रन्थस्य निबन्धने यादृशं प्रौढत्वमपेक्षते ततोऽप्यधिकं

प्रौढत्वमपेक्षते तादृशानां ग्रन्थानां भाष्यकरणे । वासिष्ठगणपतिमुनिना कृतेषु भाष्येषु तस्य प्रतिभायाः विद्वत्तायाः च चरमोत्कर्षो लक्ष्यते । उदाहरणत्वेनात्र मुनेः जैमिनीयसूत्रभाष्यस्य कश्चिदंशो प्रदीयते ।

सूत्रम् - ''चोदनालक्षणोऽर्थो धर्मः''

**चोदना वेदः लक्षणम् प्रमाणं यस्य सोऽर्थो धर्म इत्येके व्याचक्षते । अत्रार्थः प्रयोजनं चेत्स्वर्गादिधर्मः प्रसज्येत । ज्योतिष्टोमादिर्न धर्मः स्यात् । अथ यदि प्रयोजनवति लक्षणा । देवता च धर्मः प्रसज्येत । ननु सौत्रमर्थशब्दं द्विरावर्तयामः । तेनास्माकमुभयं सिध्येत् । एकदा शक्त्यार्थ इति। अन्यदा लक्षणयार्थवानिति । वेदप्रमाणकं प्रयोजनवत्प्रयोजनं धर्म इत्युक्तं भवति । यच्छङ्कितं प्रयोजनं चेद्धर्मः । ज्योतिष्टोमादावसम्भव एव लक्षणस्य स्यादिति । तत्रोच्यते । न धर्मेणास्ति प्रयोजनत्वम् । न क्रियामात्रं हि धर्मः । तन्निष्पाद्ये खल्वात्मसंस्कारे धर्माख्या । अत एव धर्मं पुरुषार्थं भणन्तः सङ्गच्छन्ते ।**

## छन्दोविधाने अभिनवत्वम्

यदि छन्दसां विविधता वर्तते तर्हि काव्येषु पदमाधुर्यं, सङ्गीतात्मकत्वं, लयात्मकत्वं च पदे पदेऽवलोक्यते । छन्दोविधाने वासिष्ठो गणपतिमुनिरासीत् कश्चिदभिनवो विधाता । तस्य उमासहस्रनामकं स्तोत्रकाव्यम् एवात्र प्रमाणम् । चत्वारिंशत्स्तबकैः निबद्धं काव्यमिदम् । प्रत्येकं स्तबके च पञ्चविंशतिसङ्ख्यकानि पद्यानि । एकछन्दोनिबद्धः एकैकः स्तबकः । आर्या, पञ्चचामरः, तनुमध्या, गीतिः, उपजातिः, मदलेखा, वसन्ततिलका, अनुष्टुप् , ललिता, रथोद्धता, उपगीतिः, स्वागता, कुमारललिता, चम्पकमाला, प्रहर्षिणी, प्रमाणिका, मणिबन्धः, वियोगिनी, नरमनोरमा, सुप्रतिष्ठा, इन्द्रवज्रा, दोधकम्, शिखरिणी, आर्यागीतिः, वंशस्थम्, हरिणी, इन्दुवदना, तूणकम्,पादाकुलकम् इत्येतानि एकोनत्रिंशत्सङ्ख्यकानि छन्दांसि अस्मिन् स्तोत्रकाव्ये प्रयुक्तानि सन्ति । ललिता-मणिबन्ध-नरमनोरमा-सुप्रतिष्ठा-इन्दुवदना-तूणक-पादाकुलक-प्रभृतीनामप्रचलितानां

छन्दसां सुष्ठुप्रयोगेण कविः छन्दोविधाने स्वाभिनवत्वं प्रमाणयतीति निःसन्देहं वक्तुं शक्यते ।

## स्तुतिषु भक्तिपरायणता

गणपतिमुनेः स्तोत्रकाव्येषु सन्ति एतादृशानि पद्यानि यानि न केवलं मुनेः भक्तिपरायणतां प्रकटयन्ति अपितु स हृदयपाठकानां हृदयेषु साक्षात्भक्तिभावं जनयितुं प्रभवन्ति । उदाहरणत्वेनात्र पद्यमेकं प्रस्तूयते । कदाचित् घोरं तपः तप्तुमसमर्थोऽयं मुनिः स्वेष्टदेवे गणनाथे दोषमारोपयन् तं स्तौति -

**घोरं करोमि न तपो यदि तेऽपराधः**
**किं प्रेरणं न कृतवानसि रुद्रसूनो ।**
**सम्प्रेरितश्च भवता यदि नाचरेयं**
**सम्प्रेरणस्य तव का गजवक्त्र शक्तिः ।। (हेरम्बोपस्थानम्, ४:४)**

## पत्रलेखने अपूर्वा शैली

संस्कृतसाहित्ये पत्रलेखनस्योदाहरणानि विरलान्येव । सन्देशे स्पष्टता, भावानुसारिणी सरलभाषा, भावाभिव्यक्तौ सरसता, केवलमपेक्षित-वस्तूनामेवोपस्थापनं, विषयप्रतिपादने मनोज्ञा विवृतिरित्येतत्सर्वं पत्रे भवति चेत् पत्रं प्रभावात्मकं भवति । परन्तु एतत्सर्वमतिरिच्य वासिष्ठगणपति-मुनिना काचिद् विनूतना हृदयङ्गमा प्राञ्जला पत्रलेखनशैली अनुसृता आसीत् । उदाहरणत्वेन अत्र भगवन्तं रमणमहर्षिं प्रति मुनिना लिखितं पत्रमेकं प्रदीयते ।

भगवन् मायामानुष,
**इह सर्वमवदातम् । प्रभो ! मम स्थितिं श्रीचरणसन्निधौ किञ्चिन्निवेदयितुं उत्सहे । केचिन्मन्यन्ते महान्तम् आनन्दमेवपरमं लक्ष्यम् । अपरे मन्वते निरतिशयां योगसिद्धिमेव मुख्यं लक्ष्यम् । परे जानन्ति सुखदुःखातीतां कामपि स्थितिमेवप्रधानं लक्ष्यम् । इतरे बुध्यन्ते मृत्युविजयमेवाग्र्यं लक्ष्यम् । अहं तु जाने कामोपशान्तिमेव कमनीयं लक्ष्यम् । असारतया बहवः कामा**

**उपशान्ताः । विधूताः केचिदुपशान्ताः । अनूभूताः केचिदुपशान्ताः । दूरं गच्छतेति प्रार्थिताः केचिदुपशान्ताः । असारो वा ससारो वा कश्चिदेक एव कामो नोपशाम्यत्यधुनाऽपि मे । तं निषेद्धुं शक्तिरेव नास्ति मे । तं दूरं गच्छेति प्रार्थयितुं इच्छैव नोदेति मे ।**

**अत्र मम कष्टे भगवतः सहानूभूतिं याचे । विदितश्च मे स कामो भगवतः ।**

श्रीअरविन्दाश्रमस्य श्रीमातरं प्रति लिखितं पत्रमपि द्रष्टुं शक्यते ।

**भगवति श्रीमातः,**
**दुरदृष्टवशाद्दविष्ठोऽपि ते पादयोरहं स्पृशामीव सततं ते पादाङ्गुष्ठं मनसा दूरगामिना । यत्रावलोकितं मया जीवितयात्रायामेव धन्यतमे तस्मिन् दिने दिव्यं तेजः । तदेव मे ददातु मोहशमनं कमप्यन्तःप्रकाशम् । दूरस्थ इति नोपेक्षणीयः पुत्रः, यत्र क्वचिदहं वसन्नपि सन्निकृष्टः इवानुग्राह्यः, यदहं वर्षपूगैस्तव चरणाराधकः ।।**
**इति ते नित्यभक्तः हार्दः पुत्रः**
**वासिष्ठगणपतिः**

## वाक्पटुता

सदसि वाक्पटुताऽऽसीत् काव्यकण्ठस्य काचिदपूर्वा विदग्धता । यदाऽसौ सभायां किमपि व्याख्याति स्म तदास्य मुखान्निरर्गलया धारया वागमृतमभिवर्षति स्म । वादविशारदोऽयं यदा वैदुष्यभूयिष्ठायां, वादकुशलपण्डितपरीतायां सभायां प्रतिवादिभिः सह वादाय प्रवर्तते स्म तदास्य रसनाग्रे सततनृत्यरता वाणी न कदाचित् स्खलति स्म । साधारणेष्वप्यालापेषु मुनेः वाग्वैचित्र्यमासीदनुपमम् । कदाचित् तेन लिखितस्य हरसहस्रमिति काव्यस्य लुप्तिविषयं वर्णयन् गणपतिमुनिः स्वशिष्यमेकं यदवोचत् तदत्रास्य वाक्पटुतायाः उदाहरणत्वेनोपस्थाप्यते ।

**मम शिष्याणामेकः कल्पद् रामस्वामिशास्त्री मदीयं हस्तलिखितं हरसहस्रं पुस्तकं एकमेवस्थितं प्रतिलेखायादाय ग्रामं गतो गत एव स्वर्गम् । नष्टं च पुस्तकम् । मया पृष्टस्तद्बान्धवाः न तद्दृष्टमित्यब्रूवन् । मया तु**

**पुत्रनाशशोकोऽनुभूतः । इमे च श्लोकाः स्मृतावविशिष्टाः ।**

एवं मुनेः सारस्वतजीवनस्यानुशीलनेन एतादृशान्यनेकान्युदाहरणानि लब्धुं शक्यन्ते ।

## आशुकवित्वम्

यदा कस्यापि कवेरास्यकुहरादनायासं धाराप्रवाहत्वेन कवितामन्दाकिनी निरर्गलं निस्सरति तदा स कविराशुकविरित्यभिधीयते । तदानीन्तनश्रेष्ठतमेष्वाशुकविषु गणपतिमुनिरासीत् कश्चिद्विलक्षणप्रतिभासम्पन्न आशुकविः । विविधविषयनिष्णातोऽयं यदा कदापि यत् किमपि वृत्तमाश्रित्य यं कमपि विषयमधिकृत्य तरसा काव्यानि निर्मातुं प्रभवति स्म । एकदाष्टावधानप्रदर्शनसमये नलोपाख्यानमिति विषयमधिकृत्य तत्र मुनिनावधानांशभूतं घण्टाशतकं प्रणेतव्यमासीत् । परन्तु यदा मुनिः दशस्वेव पलेषु पद्यानां पञ्चविंशतिं व्याहृतवान् तदा तस्यावधानकार्यक्रमस्य अध्यक्षः - 'विरम्यताम्, अलं तावता, अनया धोरण्या घण्टैकया सार्धशतद्वयं पद्यानां वक्तुं प्रभवति भवानित्यवदातम्' इति प्रहर्षविस्मयवाहिना वचनेन तमभ्यनन्दयत् । नवद्वीपे प्रवृत्तायां पण्डितपरिषदि येन प्रकारेण गणपतिमुनिः स्वाशुकवित्वं प्रादर्शयत् तस्मात् कियदंशोऽत्रोपस्थाप्यते । सभास्थानं प्रविशन्नेव मुनिः सभायां समुपविष्टं बहुवर्षैर्वर्षिष्ठं कञ्चन गम्भीराकृतिं निर्दिश्य पार्श्वगं प्रवेशकं पुरुषमपृच्छत् 'कोऽसौ महाशय' इति । स त्वम्बिकादत्तो नामाशुकविरस्य प्रश्नं निशम्य स्वयमुत्तरदानापदेशेनावदत् - **'सत्वरकवितासविता गौडोऽहं कश्चिदम्बिकादत्तः'** । ततः युवाकविर्गणपतिः तत्सदृशमेवोत्तरार्धेन पद्यं पूरयित्वावोचत् - **'गणपतिरिति कविकुलपतिरति-दक्षो दाक्षिणत्योऽहम्'** । एतत्कथनानन्तरं 'भवान् दत्तः, अहं त्वौरसः' इत्युक्त्वा सभास्थानं चमच्चकार । एवं तत्रपरीक्षांशभूत- श्लोकव्याख्यानावसरे सर्वासामिति पदन्यासे सर्वेषामिति स्खलितम् मुनिना। अनेन लब्धावसरः परीक्षकोऽम्बिकादत्तः तमाक्षिप्यावदत् - '**अनवद्ये ननु पद्ये हृद्येऽपि ते स्खलति वाणी । तत् किं त्रिभुवनसारा तारा नाराधिता भवता** ।। एतदाकर्ण्य मुनिरवदत् - '**नेह**

**सारशब्दो विशेष्यलिङ्गः, सार इति वक्तव्ये सारा तारा इति अनुप्रासाय प्रयुक्तमसाधु भवता ।'** ततः श्लोकेनैकेन तमपृच्छत् – **'सुधां हसन्ती मधु चाक्षिपन्ती यशो हरन्ती दयिताधरस्य । न तेऽलमास्यं कविता करोति नोपास्यते किं दयितार्धदेहः ।।'** 'किं तारा स्त्री नोपासिता?' इति मां पृच्छसि । किं त्वया पुमान् कान्तार्धदेहः नोपासितः? तदनन्तरमम्बिकादत्तः पुनराक्रोशत् – **'उच्चैः कुञ्जर मा कार्षीर्बृंहितानि मदोद्धतः । कुम्भिकुम्भामिषाहारी शेते सम्प्रति केसरी ।।'** ततो गणपतिः – **'पुनश्च दोषः । न कर्मधारयान्मत्वर्थीयः । कुम्भिकुम्भामिषाहारः इति बहुब्रीहिः स्यात् । हारी केसरी इत्यसाधु प्रयुक्तमनुप्रासाय – समासीनो रसाले चेन्मौनमावह मौकले । लोकः करोतु सत्कारं मत्वा त्वामपि कोकिलम् ।।'** एवं गणपतिमुनेः आशुकवित्वस्य बहून्युदाहरणानि सन्ति ।

## अवधाननिपुणता

एकस्मिन्नेव वस्तुनि मनसः केन्द्रीकरणमेव अवधानम् इति कथ्यते । परन्तु सन्ति तत्र बहवः अवधानकलानिपुणाः ये समकालमेव बहुषु विषयेषु मनः नियोक्तुं प्रभवन्ति । त एव अवधानिनः कथ्यन्ते । एवं तत्र अष्टाव-धानिनः, शतावधानिनः, सहस्रावधानिनः दृश्यन्ते । आशुकाव्यरचनया पृष्टप्रश्नानां समस्यानां च साक्षात्समाधानं प्रदाय सभासु चमत्कारितोत्पादने एतेषामवधानिनां निरुपमं प्रावीण्यं वर्तते इत्यत्र न संशयावकाशः । काव्यकण्ठो गणपतिमुनिः बहषु विबुधजनगोष्ठीषु बहुवारमष्टावधानं प्रणीतवान् आसीत् । अत्र तस्य अवधाननैपुण्यस्योदाहरणत्वेन प्रसङ्गोऽयमुपस्थाप्यते । एकदा कश्चन संस्कृतज्ञ आन्ध्रकविः 'कविताम् अधिकृत्य मतं भवतो वसन्ततिलकया वक्तव्यम्' इति गणपतिमुनिम् अभ्यर्थितवान् । परन्तु स आन्ध्रकविः मुनये साक्षात्पद्यरचनायावसरं न दत्तवान् । स एकस्मिन् लेखफलके षट्पञ्चाशत्स्थानात्मकं कोष्ठं विलिख्य यथानिर्दिष्टं स्थानेष्वक्षरविन्यासार्थं मुनेः हस्ते फलकं प्रादात् । (वसन्ततिलकायां प्रत्येकं पादे चतुर्दशाक्षराणि भवन्ति । एवं चतुर्षु पादेषु षट्पञ्चाशदक्षराणि । अतः षट्पञ्चाशत्कोष्ठकानि ।) ततः पौर्वापर्यव्यतिक्रमेण

पृच्छकेन आन्ध्रकविना निर्दिश्यमानेषु स्थानेषु एकैकमक्षरं यथास्थानं विन्यस्य अनायासमेव निम्नोक्तं पद्यं व्यरचयत् गणपतिमुनिः ।

**प्रीतिं ददाति विपुलां श्रियमातनोति**
**निर्माति नूत्नसमयं दुरितं धुनोति ।**
**आर्द्रीकरोति हृदयान्यपि देवतानां**
**कस्मै शुभाय न भवेत्कविता विदोषा ।।**

अष्टावधाने व्यस्ताक्षरकथनं भवति कश्चिदंशः यत्र अवधानप्रणयनसमये पृच्छकः व्यवधानेन स्वमनसि स्थितस्य कस्यापि श्लोकस्याक्षरसङ्ख्याम् अस्तव्यस्ततया श्रावयति । अवधानी सावधानं तच्छ्रुत्वा अस्तव्यस्ततया दत्तानाम् अक्षराणां सम्यक् संयोजनं करोति तथा चावधानान्ते साधुरूपेण पृच्छकस्य मनसि स्थितं तं श्लोकं सभायां समुपस्थापयति । एवं मद्रपुरे प्रवृत्ते कस्मिंश्चिदवधाने काव्यकण्ठस्य समुन्नतिमवनमयितुमिच्छन् केनचित् पृच्छकेनातिदीर्घं स्त्रग्धरावृत्तनिबद्धं स्वरचितं पद्यमेकं मनसि स्थापयित्वाक्षर-सङ्ख्याकथने प्रवृत्तोऽभवत् । परन्त्वन्तेऽवधानकलानिपुणो गणपतिः कथमपि तं सम्यग्धृतं श्लोकमक्षरशो व्यत्यस्तं लिखित्वा सभायै प्रदर्श्य पुनस्तं यथापादाक्षरक्रमं चाब्रवीत् । तदिदं पद्यम् -

**अप्सां द्रप्सामलिप्सां चिरतरमचरं क्षीरमद्रक्षमिक्षुं**
**द्राक्षां साक्षादजक्षं मधुरसमधयं द्रागविन्दं मरन्दम् ।**
**मोचामाचाममन्यो मधुरिमगरिमा शङ्कराचार्यवाचाम्**
**आचान्तो हन्त किं तैरलमपि च सुधासारसीसारसीम्ना ।।**

## देशभक्तिनिष्ठा

स्वशिष्याय लिखिते एकस्मिन् लेखे मुनिरसूचयत् - "मम लक्ष्यं यत्पूर्वं तदद्यापि देशस्य राजकीय-साङ्घिकविमोक्षः, हरिजनोद्धरणम्, सत्यवैदिकमतस्थापनं चेति । तत्र साधनं तप एकमेव ।" स्व-मातृभूमिभारत-धरण्याः सन्तापनाशाय दृढमतिर्गणपतिरासीत्तदानीन्तनेषु देशभक्तेष्वन्यतमः । मातृभूमेः संरक्षणार्थं, पारतन्त्र्यपाशविच्छेदनार्थं च कठोरतपश्चरणमासीत्तस्य

जीवनस्यैकं प्रधानं कर्म । तस्य साहित्यभाण्डारस्य बहुषु स्थलेषु सन्ति एतादृशानि पद्यानि यानि मुनेः देशभक्तिपरायण्त्वं प्रकटयन्ति । तद्यथा 'उमासहस्रे' -

**जयतु भरतक्षोणीखण्डं विषादविवर्जितं**

**जयतु गणपस्तस्य क्षेमं विधातुमना मुनिः । (१४. २४)**

इन्द्राणीसप्तशतीति नामके स्तोत्रे गणपतिमुनिः भारतभूमेः रक्षणार्थं स्वेष्टदेवीमिन्द्राणीं पुनः पुनः स्तौति । तद्यथा -

**विधाय रिपुधूर्तिं निधाय सुदशायाम् ।**
**पुलोमतनुजाता धिनोतु भरतक्ष्माम् ।। १०२।।**
**ददातु भरतक्ष्माविषादहरणाय ।**
**अलं बलमुदारा जयन्तजननी मे ।। १२४।।**
**कारुण्यामृतसिक्ता शक्ता शक्रमहिष्याः ।**
**प्रेक्षा भारतभूमेर्दौर्बल्यं विधुनोतु ।। १२७।।**
**अमृतं सङ्किरन्त्या प्रसरन्त्येह दृष्ट्या ।**
**सुरराज्ञी बलाढ्यां भरतक्ष्मां करोतु ।। १५२।।**

न केवलं भारतभूमेः पारतन्त्र्यविच्छेदनमपितु स्वाधीनताप्राप्तेरनन्तरं स्वाधीनभारतस्य सुपरिचालनं कथं भवेदित्यपि तेन विचारितमासीत् । एतदर्थं साम्रज्यनिबन्धनमिति ग्रन्थे तेन षष्ट्यधिकपञ्चशतसूत्रैः स्वाधीनभारतस्य सुव्यवस्थितं संविधानं कल्पितम् आसीत् ।

ततः केचनांशा अत्र प्रस्तूयन्ते ।

**प्रथमोऽध्यायः**

**प्रथमम् अधिकरणम्**

**अथातः साम्राज्यनिबन्धनम् ।। १।।**

**प्रभुत्वबन्धकं तत्कृत्याधिकारनियामकं प्रजाधिकारमर्यादाविधायकं साङ्घिकधर्ममर्यादोपदेशकं च शास्त्रं साम्राज्यनिबन्धम् ।। २।।**

**भारतायेदं प्रक्रियते ।। ३।।**

**समष्ट्याऽवयवशश्च शास्त्रे निबन्धनसंज्ञा ।। ४।।**

द्वितीयम् अधिकरणम्
नरिष्टा मन्त्रिमण्डली राजकुलं सम्राट् चेति चतुष्पात्परिपालकव्यूहः प्रभुत्वम् ।।५।।
अर्हप्रजावर्गाणामर्हप्रतिनिधिभिर्बद्धा सभा नरिष्टा ।। ६।।
नरिष्टात उत्पादितः कार्यनिर्वाहकवर्गो मन्त्रिमण्डली ।। ७।।
न्यायनिर्वहणेऽन्त्यं निर्णयं दातुं प्रभवित्री सम्राट्पुरःसरा प्राड्विवाकसभा राजकुलम् ।। ८।।
साम्राज्यस्य वंशपरम्पराधिकारवानीश्वरः सम्राट् ।। ९।।
नरिष्टान्तर्भूताया अपि मन्त्रिमण्डल्याः कार्यविशेषादुत्पत्तिविशेषाच्च पृथगपि व्यपदेशः ।। १०।।
एवं राजकुलान्तर्गतस्यापि सम्राजः ।। ११।।

अपि च भगवन्तं रमणमहर्षिं प्रति लिखितं पत्रमेतद्देशभक्तिभावनोद्भासित-चेतसः गणपतेर्मातृभूमिभक्तिपरायणताया उदाहरणत्वेन प्रदीयते ।

भगवन् भक्तवत्सल,

वीक्षितो मन्त्रजपस्य महिमा । विलोकितो योगस्य सारः । विचारितो विशेषतः शास्त्रार्थः । चरितमेकाग्रालोचनेन तपः । परीक्षितः कुण्डलिन्याः शक्तेरुल्लासः । निरीक्षितमहमो जन्मस्थानम् । अन्वीक्षितो मौनेन प्रकृतेः पाकः । दूरीकृतो भेदभावः । निराकृतो विषयसङ्गः । निरस्तं चापलम् । अभ्यस्तं स्थैर्यम् । तथाऽपि नास्मि तृप्तः । सम्प्रति जिगमिषुरस्मि भक्त्यैव तृप्तिम् । तस्यास्त्रीणि स्थानानि भवन्ति । प्रथमं स्थानं भगवान् महर्षिः । द्वितीयं स्थानं भगवान् भुवनपतिरिन्द्रः । तृतीयं स्थानं भगवती माता भारतभूमिः ।।

इति ते
चिरन्तनो भक्तः
गणपतिः

तीव्रतपश्चरणेन देशस्य पारतन्त्र्यविमोचनार्थं दत्तचित्तानां, समर्पितप्राणानां देशभक्तिपरायणत्वं को नु कतिपयैर्वाक्यैरेव वर्णयितुं शक्यते ।

## उपसंहारः

श्रीमता काव्यकण्ठेन गणपतिमुनिना प्रायः पञ्चसहस्रसङ्ख्यकाः श्लोकाः विरचिताः। सप्तसहस्राधिकसङ्ख्यकानि सूत्राणि विनिर्मितानि । शताधिकवेदमन्त्राणां व्याख्यानं कृतम् । सम्पूर्णमहाभारतस्य रहस्यम् उद्घाटितम् । नव्य-भव्य-स्वाधीनभारतस्य संविधानं कल्पितम् । स्व-सारस्वतसाधनया आधुनिकसंस्कृतवाङ्मयनिर्माणे, संस्कृतभाषायाः प्रचारे, वैदिकपरम्परायाः पुनरुद्धारे यादृशं योगदानं मुनिना कृतं तदविस्मरणीयम् । तथाप्याधुनिकसंस्कृतजगत्यविदितप्रायोऽयं पुण्यात्मा ।

पद्यकाव्यप्रणयनं भवतु गद्यकाव्यनिबन्धनं वा, सूत्रनिर्माणो भवतु भाष्यविरचनं वा, तत्त्वानुशीलनं भवतु पत्रलेखनं वा, सर्वत्र गणपतिमुनिना यादृशी शैली अवलम्बिता, यादृशमभिनवत्वमाश्रितम्, यादृशं वैविध्यमनुसृतम्, यादृशी प्राञ्जलता विहिता, मनोहारिता च प्रकटिता तत्सर्वं निरीक्ष्य निखिलेऽप्याधुनिकसंस्कृतवाङ्मये वासिष्ठो गणपतिमुनिरासीद् गरिष्ठो वरिष्ठश्चेति निश्चप्रचं वक्तुं शक्यते ।

पाण्डिचेरी - ६०५००२ | सम्पदानन्दमिश्रः
दिनाङ्कः- २२. १०. २००४ | सहसम्पादकः

# Introduction to the Contents of Volume Two

After the formal release of the first volume of the Collected Works of the Muni, there has been a great eagerness by many devotees of the Maharshi and the Muni, and other scholars to see the other volumes in print form. As it is an enormous task to compile and edit all the writings of the Muni, it is not possible to print all at once. The volumes are going to appear in book forms one after another.

The first and second volumes of the *Collected Works* contain all the *stotras* dedicated to different forms of the Divine Mother, whereas the third volume has the *stotras* dedicated to different gods only. *Umāsahasram*, the *magnum opus* of the Muni forms the major part of the first volume. The current volume has *Indrāṇī Saptaśatī* as the major work among others. The entire text is given in *Devanāgarī*. As many people are not acquainted with *Devanāgarī*, and look forward to have a transliteration of the original Sanskrit text, all the *stotras* have been given in Roman transliteration. It is gratifying to hear from several devotees that how the *Umāsahasram* in Roman transliteration appearing in the first volume, has helped them to do the *pārāyaṇam* (regular study) of this great work of the Muni. A *Shloka Index* for all the *stotras* in this volume also has been given for use as a referential tool. In addition to the general introduction to life and works of the Muni this volume has a Sanskrit write-up (by Dr. Sampadananda Mishra) highlighting the sholastic and poetic beauty of the different writings of the Muni.

This volume has nine *stotras*. All these *stotras* are dedicated to different aspects of the Divine Mother.

The very first *stotra, devīstotramañjarī,* is an adoration to the glory of the universal Mother. This poem starts with the

praise of Himavan, the father of Goddess Uma, and ends with several names of the universal Mother as mentioned in the *devīmāhātmyam*. This *stotra* has 120 verses written in different *chandas* (metres). These verses are distributed over eleven sections (*paṭalas*).

The second *stotra*, *tripurasundarīgītam,* describes the *saguṇa* form of the Goddess Tripurasundari, and the beauty of the goddess from her head to the toes. The poet extols the Goddess in 18 elegant verses in *supartiṣṭhā* metre.

The third *stotra*, *amṛtāmbāpañcaratnam*, was composed by the Muni during his stay at vellore in 1905. The deity Amritamba is the consort of Narasimha. A temple of Narasimha is situated at Sholingar in Vellore District. Goddess Amritamba is extolled here in five *āryā* verses.

Bhagvan Ramana Maharshi's mother left her body after she attained to liberation (*mukti*) in May 1922 at Skandasram. Ganapati Muni was present when her body was put into *samadhi* at the Ramanasrama. He composed six verses praising the Mother of the Maharshi, and named the stotra as *saundaryāmbā-nirvaṇaṣaṭkam*. This is the fourth *stotra* of this volume. The verses are composed in *āryā* metre .

The fifth *stotra, reṇukāṣaṭkam,* has six verses written in *bṛhatī* metre. Here the poet extols goddess Renuka, the mother of Parashurama.

The sixth *stotra* is known as *reṇukāsaptakam.* Ganapati Muni, during his tapasya at Pudaimedu in Vellore District, lauded the goddess Ranuka by composing seven verses of this *stotra*. These verses are composed in *āryā* metre.

The seventh *stotra*, *indrāṇī-saptaśatī*, is a poem containing seven hundred verses in the praise of Indrani, the consort of the paramount Lord Indra of the Vedas. This particular *stotra* forms the main part of this volume. This was composed by Sri

Vasishtha Ganapati Muni in 1922, while he was doing *tapas* in the Mango tree cave on the mount of Arunachala. Although, it was summer, and the sky was cloudless – bright with sunlight, at the time of composition of the seven hundred verses, every evening there appeared in the sky flashes of lightning, indicating the very presence of Indrani – the great *vajra-vairocanī* Shakti of Indra. This *stotra* was later revised and the final version of the text (given in this volume) was completed much later by the Muni in March 1931, during his stay at Sirsi in North Kanara District. He deleted many verses from the original text, added new verses, and amended a few.

The Muni composed *indrāṇī-saptaśatī* in seven metres used in the Vedas – *gāyatrī, uṣṇik. anuṣṭubh, bṛhatī, paṅkti, triṣṭubh* and *jagatī*. These verses are distributed over seven *śatakas* (a century of verses) – each *śataka* composed in one of the seven Vedic metres. A *śataka* is further divided in to four parts with twenty-five verses in each.

Each verse of this *stotra* reflects the glory of the Goddess Indrani. Here the seer-poet has reconciled Indra of the Vedas with Maheshwara (the great controller) of the Tantras. In this *stotra* many of the secrets of the Vedas, Yoga and Mantras have been revealed. It is interesting to note that in this *saptaśatī*, goddess Renuka, the mother of Parashurama (the sixth incarnation of Lord Vishnu), Draupadi (a character in the *Mahabharata*), and Mary, the mother of Jesus Christ (who came to this world to expiate for the hurdles of sins of the entire mankind) have been specially extolled as the three incarnations of the great Divine Mother – the Maha Shakti.

In the first invocatory verse of each *stabaka* the alluring smile of the Divine Mother is praised and in the second verse of the same *stabaka*, the poet prays the goddess to protect this land of Bharata. In the twenty-fourth verse of every *stabaka*, the poet

seeks for grace of the Divine Mother to be an instrument in the immense task of serving his country in order that it regains its past glory. In the twenty-sixth *stabaka*, (where all the verses are written in a metre called *jaloddhata-gati* by using the refrain तवाम्ब चरणं व्रजामि शरणम् – O mother, I seek refuge in thy feet), the Muni prays again and again to the goddess Indrani for the upliftment and protection of his country at this juncture when all human efforts are not enough to release her from the bondage of darkness and inertia. In the last verse of every *stabaka*, the name of the metre, in which the verses of that *stabaka* are composed, is mentioned. The saint-poet followed this style in each of the twenty-eight *stabakas*. In the second *stabaka*, Indrani is praised in the form of space (ether) in a marvelous manner. The ninth *stabaka* has the ultimate Reality as its subject matter. In the eleventh *stabaka*, the poet has described various Upanishadic *vidyās*, with great poetic beauty. In this seductively fascinating poem every reader is sure to be entertained by its poetic excellence where there is an effortless play of alliterations.

In the eighth *stotra* goddess *pracaṇḍa-caṇḍī* is extolled in three hundred verses. *Pracaṇḍa-caṇḍī* is the sixth of the ten *mahāvidyās* as described in the Vedas, Upanishads and Tantras. She is also called *chinnamastā* which literally means the one whose head is severed. She is the Goddess whose grace releases the ordinary human mind from its ignorance, and raises it to a state of pure awareness. The Muni talks about her form, about her *mantras*, about the methods of worshipping her etc. in this poem. The ideal way to worship this goddess is to withdraw one's attention from the objects seen and meditate solely upon the Divine within, the true *draṣṭā*. The verses here are organised within three *śatakas*. Each *śataka* is further divided into four *stabakas* with twenty-five verses each. In each of the *stabakas*, the Muni has used one particular metre for the composition. Therefore, each

*stabaka* is named after the metre used therein.

*Maṅgalagaurīstotram* is the last *stotra* of this volume. Here the most auspicious form of the glorious Divine Mother has been extolled in eight beautiful verses composed in *āryā* metre. With this volume all the *stotras* dedicated to different aspects of the Divine Mother composed by Vasishtha Ganapati Muni, are completed. As it is a tradition to sing the glory of the Divine at the end, this *stotra*, with its lyrical beauty marks the end of this volume.

# देवीस्तोत्रमञ्जरी

## प्रथमः पटलः

जयति स नगाधिराजो निकेतने यस्य निर्जरस्तुत्या ।
जगतः शुभाय जाता माता मातङ्गवदनस्य ।।१।।

कनकगिरेरपि धन्यः सितशिखरीवासभूमिरीशस्य ।
सितशिखरिणोऽपि धन्यस्तुहिनाद्रिस्तव भवानि पिता ।।२।।

द्वावेव कीर्तयामो भवभामिनि भाग्यशालिनामादौ ।
श्रीतातममृतराशिं तव तातं भूभृतामीशम् ।।३।।

त्वयि गिरिपुरि जातायां दुन्दुभिनादश्छलेन विहताशा ।
मुक्तप्रसवाभरणा चक्रन्देवाम्ब शक्रपुरी ।।४।।

सकलप्रपञ्चमाता करुणालहरीभिरन्तरे शीता ।
भाषितमार्गातीता जयतितरां हिमगिरेर्जाता ।।५।।

शीतलकटाक्षपाता पूता निःशेषविष्टपख्याता ।
अविगीता मुनिगीता जयतितरां हिमगिरेर्जाता ।।६।।

पालितदोषापेता प्रेम्णा पुरवैरिणो वशं याता ।
अवतंसितशशिपोता जयतितरां हिमगिरेर्जाता ।।७।।

अपि दूषणं तुषारो भूषणमेवास भूधरेन्द्रस्य ।
अकृतात्मभ्यो गोप्ता प्रकृतेर्लीलावतारभुवः ।।८।।

कचसंहतावराला शालाऽसौ सकलसुगुणनिवहस्य ।
धूतनतपापजाला जयतितरां हिमगिरेर्बाला ॥९॥

## द्वितीयः पटलः

रमणीयत्वातिशयः स जयति नीहारशैलनन्दिन्याः।
दग्धः प्रसूनबाणो भूयः सञ्जीवितो येन ॥१०॥

लावण्यमेव शङ्करवाल्लभ्यायास देवि पर्याप्तम् ।
घोरं तु तपःकेवलमाभरणं तव चरित्रस्य ॥११॥

न गिरां पथि सुकुमारः प्रतिवासरभिद्यमानरुचिसारः ।
शङ्करलोचनपेयः शिशुतापायेम्ब ते कायः ॥१२॥

युवतेस्तव हरदयिते लावण्यं को नु वर्णयितुमीष्टे ।
कान्तिगुणमर्मवेत्तुः प्रसूनबाणादृते देवात् ॥१३॥

लावण्यं तव पर्वतमहेन्द्रजे तादृशं विधिर्व्यतनोत् ।
मौनगुरुर्भगवानपि यद्वीक्षणसङ्गवानेव ॥१४॥

तपसा कृशेऽपि देहे लावण्यं शिखरिपुत्रि ते ववृधे ।
मोहं तत्पूर्वमितस्तदा ततः शङ्करो हेतोः ॥१५॥

चरणेन तव सरोजं सादृश्यं कथमगात्मजे भजताम् ।
चन्द्रेणैकेन जितं चन्द्रसभासेव्यमानेन ॥१६॥

कमलस्य तव पदस्य च भेदः सोऽयं नगाधिराजसुते ।
एकस्य हरिणधारजेतारिः किङ्करोऽन्यस्य ॥१७॥

शङ्करदृक्‌विषये द्वे परस्परस्मरणहेतुतां भजतः ।
तव चोरुरम्ब नगजे शुण्डा च गजेन्द्रवदनस्य ।। १८ ।।

चित्रं कुलाद्रिदुहितुर्वलिसोपानत्रये पदं न्यस्य ।
भवदीये कुसुमास्त्रो विवेश हृदयं महेशस्य ।। १९ ।।

हेमघटडम्बरहरं पीतं लम्बोदरेण देवेन ।
तव मह्यमम्ब दिशतु श्रेयांसि पयोधरद्वन्द्वम् ।। २० ।।

मदनस्य दुर्गभूमिर्विद्विषतः शूलपाणिमरिभीमम् ।
तव सकललोकमातः कुचरत्नगिरिद्वयं जयति ।। २१ ।।

अकपोलकमविलोचनमनधरमश्रोत्रमकचमल्पाभम् ।
कथमनुकरोतु बिम्बं चन्द्रस्य मुखं मृडानि तव ।। २२ ।।

लोके चकोरनिवहः पीयूषकरस्य पिबति करनिकरम् ।
शङ्करनयनचकोरौ त्वन्मुखरुचिमम्बिके पिबतः ।। २३ ।।

निटलस्थलं जिगमिषुर्बिम्बोष्ठादचलपुत्रि मन्ये ते ।
नयनाख्यकान्तिनद्यां नासासेतुं व्यधान्मदनः ।। २४ ।।

तरलं ते हरदयिते लोचनलावण्यनिर्झरं द्वेधा ।
नासासेतुविभक्तं सुभङ्गमनघाङ्घ्रि देवि नुमः ।। २५ ।।

शिरसा सति ध्रियन्ते त्वयालकाः पुत्रि गोत्रसुत्राम्णः ।
अपि कुटिलमलिनमुग्धाः शितिकण्ठस्य प्रियाः पत्युः ।। २६ ।।

चिकुरकिरणास्तवेश्वरि जटामयूखैः पुरामरैर्मिलिताः ।
पटुदहनधूमशङ्कां प्रमथानामसकृदादधति ।। २७ ।।

चिकुरनिकुरम्बमीश्वरि तव कालिन्दीतरङ्ग कमनीयम् ।
पङ्कं शङ्करभामिनि मदीयमखिलं निवारयतु ।। २८ ।।

वेणीं महिषनिषूदिनि सुमकलितां ते कपर्दिनं जेतुम् ।
शङ्कामहेऽर्च्यमानां शम्बरविद्वेषिणा शक्तिम् ।। २९ ।।

वचनानि यानि भवती भणति पुरारातिकर्णपेयानि ।
तान्यमृतं स्मरमथितप्रेमसमुद्रोदितं मातः ।। ३० ।।

वचनानि कानिचित्तव भवदयिते भुवनमौलिमाल्यानि ।
अनवद्यशब्दकुसुमैर्बुद्ध्या ग्रथितानि विजयन्ते ।। ३१ ।।

## तृतीयः पटलः

शङ्करस्य भसितीकृतः शिवे वह्निना निटलनेत्रजन्मना ।
दृग्विलाससुधया तवाभजज्जीवितं जलचरध्वजः पुनः ।। ३२ ।।

पाणिपादमचलेन्द्रपुत्रि ते पारिजातनवपल्लवोपमम् ।
अक्षपाविरहमङ्गभासरित् स्वर्णकोकमिथुनं स्तनद्वयम् ।। ३३ ।।

पूर्णिमाकुमुदबान्धवोपमं सम्प्रसादसुषमास्पदं मुखम् ।
नीरजच्छदनिभे विलोचने दाडिमप्रसवलोहितोऽधरः ।। ३४ ।।

मौक्तिकालितुलिता रदावली नासिका तिलसुमानुकारिणी ।
अल्पमप्यधिकवैभवं स्मितं बम्भरच्छविमलिम्लुचः कचः ।। ३५ ।।

कोकिलस्य सहकारिवासिनः काकलीमपिहसेद् गलस्वरः ।
राजहंसकुलदुर्लभागतिर्धामवाक्यसरणेरगोचरम् ।। ३६ ।।

सर्वशास्त्रपरिनिष्ठितामतिश्चातुरी च बुधमण्डलस्तुता ।
आप्यनन्यसुलभं महत्सुखं त्वां शुभाङ्गि परिणीय शम्भुना ॥ ३७॥

## चतुर्थः पटलः

सखीकपोलेषु न सारचर्चा देहे महेशस्य विभूतिलेपः ।
मन्देतरां मे वितनोतु भूतिं मन्दस्मितश्रीर्नगकन्यकायाः ॥ ३८॥

भूषातुषारांशुमयूखजालैः सङ्गम्य शुभ्राद्रिवनस्थलीषु ।
चिरं चरन्त्यो धरराजकन्या हासत्विषो मे शमयन्तु शोकम् ॥ ३९॥

हराद्महासद्युतिभिर्मिलित्वा कैलाससन्तानवनान्तरेषु ।
क्रीडन्नगाधीशकिशोरिकाया हासोऽलसो मे कुशलं करोतु ॥ ४०॥

अस्माकमुल्लासनिवासभूमिर्धावल्यजन्मस्थलमल्पमेव ।
धुनोतु दुःखानि हृदि स्थितानि लीलास्मितं धूर्जटिवल्लभायाः ॥ ४१॥

नासालसन्मौक्तिकरश्मिडिम्भैः सङ्गम्य दन्तच्छद वेदिकायाम् ।
खेलन् कुलं वः सकलं पुनातु कुलाद्रिबालादरहास बालः ॥ ४२॥

न स्तौतिकः सामजवक्त्रमातुर्विख्यातकृत्यं दरहासवीरम् ।
आलोकमात्रात्सकलेशमाधाद्यः शङ्करं किङ्करमङ्गजस्य ॥ ४३॥

अगात्मजे हासमृगाधिपस्ते मनोगजं मन्मथशासनस्य ।
नखैर्मयूखच्छलमावहद्भिः सन्दार्य रक्तं भृशमाततान ॥ ४४॥

पीठे निषण्णे दशनच्छदाख्ये भावप्रसङ्गं बहिराददानः ।
हरं रतं काममते वितन्वन् आचार्यवद्भाति तवाम्ब हासः ॥ ४५॥

बिम्बाधराख्ये शकटे निषण्णो बाणैर्मयूखैस्तव देवि हासः ।
पुरामरातिं समरे जिगीषोः साहाय्यकं चित्तभुवः करोति ॥ ४६॥

क्षणेन देवं दहनोग्रभालं वशे विधाय प्रसवायुधस्य ।
हासेन शीताद्रिकुमारिके ते स्वल्पेन च ख्यातिरतीव लब्धा ॥ ४७॥

मन्दोऽपि बोधं तनुते मुनीनां स्वच्छोऽपि रागं कुरुते हरस्य ।
अल्पोऽपि लोकस्य बभूव मान्यो हासो नगाधीशकिशोरिके ते ॥ ४८॥

बाह्यान्धकारस्य विनाशनेऽपि समग्रसामर्थ्यविहीनमिन्दुम् ।
अन्तस्तमो दर्शितविक्रमाणि तव स्मयन्ते जननि स्मितानि ॥ ४९॥

## पञ्चमः पटलः

विहरतादिदं मिहिरकान्ति मे ।
मनसि सर्वदा जननि ते पदम् ॥ ५०॥

इदमुदारवाङ्मुनिजनस्तुतम् ।
शरणमीश्वरि चरणमस्तु मे ॥ ५१॥

गमनचातुरी विजितवारणा ।
गणपतिप्रसूर्वनरुहानना ॥ ५२॥

अमरमण्डली विनुतवैभवा ।
अवतु वः कुलं शिवकुटुम्बिनी ॥ ५३॥

स्मर सकृत् सखे स्मरजितः प्रियाम् ।
तव यदि श्रमो भवति संसृतौ ॥ ५४॥

तव शिवप्रिये चरणपल्लवम् ।
श्रुतिनितम्बिनी चिकुरभूषणम् ॥५५॥

## षष्ठः पटलः

विष्टपाम्ब ते पादपङ्कजम् ।
अस्तु कस्तुते शस्तकारि मे ॥५६॥

त्वत्पदाम्बुजं संश्रितः कृती ।
भीतिभाक् भवेदम्ब किं भवे ॥५७॥

तत्त्वमम्ब ते सत्त्ववन्नुते ।
केन वा विना केन वर्ण्यताम् ॥५८॥

यद्विलोक्यते तन्मृषाखिलम् ।
दृक्स्वरूपिणि त्वं तु लोकसे ॥५९॥

चन्द्रधारिणो रामया मम ।
जातुचिन्मनो नो वियुज्यताम् ॥६०॥

उत्तमोत्तमा चित्त चिन्त्यताम् ।
कृत्तिवाससो मत्तकाशिनी ॥६१॥

## सप्तमः पटलः

अनल्पवासनाचयं विमुञ्च शोकदायकम् ।
अये वयस्य मातरं गजाननस्य चिन्तय ॥६२॥

अशेषधात्रि पार्वति त्वदीयपादपङ्कजम् ।
विचिन्तयन्ति ये जनास्तरन्ति ते भवाम्बुधिम् ।। ६३।।

न तस्य जातुचिद्विपद्विपन्नवत्सले शिवे ।
यदीयचित्तपङ्कजे त्वदीयपादपङ्कजम् ।। ६४।।

सखे न खेदभाजनं भवेत् किलाश्रितो जनः ।
इमाममेयवैभवां भवस्य जीवितेश्वरीम् ।। ६५।।

अशेषराज्ञि कारणं समस्तलोकसंहृतौ ।
निमेष एव देवि ते निमित्तमात्रमीश्वरः ।। ६६।।

त्वदङ्घ्रिकञ्जचिन्तकः शिवस्य जीवितेश्वरी ।
निहत्य वासनाचयं परं पदं प्रपद्यते ।। ६७।।

विपश्चितां सतां मनो न भावि जातुकातरम् ।
विचिन्तयन्ति ये शिवे पदाम्बुसम्भवं तव ।। ६८।।

## अष्टमः पटलः

मेदिनीधराधिनाथकन्यका कलावती
ध्यानगम्यपादपद्मयुग्मका कृपावती ।
भृङ्गमेचकालकावतंसितेन्दुबालका
राजताद्रिवासिनी विलासिनी गतिर्मम ।। ६९।।

चण्डमुण्डधूम्रनेत्ररक्तबीजनाशिनी
चन्द्रखण्डचूडचित्तमोहिनी परात्परा ।

निर्जरीसमूहमौलिरत्नरञ्जिताङ्घ्रिका
राजताद्रिवासिनी विलासिनी गतिर्मम ।। ७० ।।

बालपल्लवाधरा मनोज्ञमालिकाधरा
भाललोचनाङ्गना शिवा पवित्रकीर्तना ।
मत्तकुम्भिराजकुम्भडम्बरापहस्तनी
राजताद्रिवासिनी विलासिनी प्रणम्यते ।। ७१ ।।

शोणशैलनाथपादवासिनी तपस्विनी
मौनिवर्गपूजिताङ्घ्रिपङ्कजद्वयाऽभया ।
मातृवत्सदाऽपि भक्तलोकरक्षणे रता
घासकान्तिरीश्वरी मदन्तरे विभासताम् ।। ७२ ।।

पुष्करानुजन्मवत्रिह्नशीतभानुपूर्वजै-
र्नीलकञ्जबन्धुना च संयुतैरुदेति या ।
सा नृसिंहशक्तिरुग्रविक्रमोग्रमानिनी
मन्त्रराजरूपिणी महेश्वरी गतिर्मम ।। ७३ ।।

वेदशैलवासिनी सुरापगातटालया
योगिहृन्निकेतना कदम्बकाननप्रिया ।
ताण्डवावलोकने निबद्धमानसा सदा
शोणशैलमोहिनी नितम्बिनी गतिर्मम ।। ७४ ।।

देवलोकपूजिताङ्घ्रिरीश्वरस्य भामिनी
मानसाभिधानवारिसम्भवार्पणप्रिया ।
साधुकामदायिनी दुरात्मकामघातिनी
वीरलोकमाननीयमादधातु मामुमा ।। ७५ ।।

पावनस्थलेषु या चिदम्बरादिषु स्थिता
मानसेषु मौनिनां सदापि या विराजते ।
सा स्वकीयचित्तवैरिनाशनाय दीक्षितं
वीरलोकमाननीयमादधातु मामुमा ।। ७६ ।।

शीतलांशुपोतधारिमानसस्य वल्लभा
शीतलाद्रिनन्दिनी विलोकितेषु शीतला ।
शीतलांशुपूर्णबिम्बभेदवर्जितानना
वीतसर्वतापजालमादधातु मामुमा ।। ७७ ।।

## नवमः पटलः

कल्याणपूजितपदा कल्याणं दिशतु काऽपि मे देवी ।
यस्याः कलेवरार्धं कश्चन पुरुषः कपालधरः ।। ७८ ।।

गणपतिपीतोरोजा गतिचातुर्यापहसितगजराजा ।
गगनचरसेव्यमाना गरलगलप्रेयसी जयति ।। ७९ ।।

जलजातदीर्घनयना जलजासनमुख्यदेवताविनुता ।
जागर्तु सम्पदे मे कम्पातटवासिनी देवी ।। ८० ।।

तनुकान्तिविजितकनका तरणिः संसारदारुणाम्भोधेः ।
तरुणारुणाभचरणा तनोतु मे गिरिसुता क्षेमम् ।। ८१ ।।

दरहसितविजितमुक्ता धाराधरसाम्यधारिकचभारा ।
दूरीकरोतु दुरितव्रातं मे पशुपतेर्दयिता ।। ८२ ।।

न स्तूयतां सुकविना केन स शैलेन्द्रपुत्रिकालोकः ।
येन व्यधायदग्धः प्रत्यागतजीवितः कामः ॥८३॥

बलमम्ब देहि मह्यं बलसूदनमुख्यदेवताविनुते ।
बलिविभवहरसहोदरि बलिमेतत्कल्पयामि मनः ॥८४॥

मम तापमाशु हरतान्ममताहन्तानिवारिणी भजताम् ।
तुहिनमहीधरबाला तुहिनकरापीडहृदयेशी ॥८५॥

दशमः पटलः

देशिकरूपा नाशितपापा ।
सा जनगीता राजति माता ॥८६॥

मानवति जनचरणप्रणतिम् ।
माननिवारणकामः कुरुषे ॥८७॥

मानव जेतुं निजमभिमानम् ।
मानय गौरीचरणद्वितयम् ॥८८॥

धान्यं न धनं कनकं न धनम् ।
रत्नं न धनं वसुधा न धनम् ॥८९॥

यत्परिरक्षति यातं निधनम् ।
तदिदं गौरीपदमेव धनम् ॥९०॥

भवार्दितानां भवतात् सहायः
सहायवल्लीकरुणा कटक्षः ।

यस्य प्रसादादभवत्परस्य
द्रष्टा गुरुर्मे भगवान्महर्षिः ।। ९१।।

सुधाकरालङ्कृतचारुचूली
शिवां मतिं वः प्रददातु काली ।
यन्नामगायी किल रामकृष्णो
धीराग्रगण्यः परमालुलोके ।। ९२।।

त्वं सर्गशक्तिरजवक्त्रसरोरुहस्था
सन्त्राणशक्तिरसुरारिहृदि स्थिता त्वम् ।
संहारशक्तिरभवस्य कलेवरार्धं
देवि त्वमेव परमा त्रिगुणातिगाम्बा ।। ९३।।

## एकादशः पटलः

प्रपन्नजनपापघ्नपदपङ्कजरेणुकाम् ।
मारीमुमांशसञ्जातां मुहुर्गायामि रेणुकाम् ।। ९४।।

समुत्तुङ्गस्तनाभोगखेलद्गुञ्जाफलश्रियम् ।
वन्दे दुरत्ययां मायां बिभ्रतीं शबरीवपुः ।। ९५।।

वन्दे मरकतच्छायां मत्तमातङ्गगामिनीम् ।
मतङ्गकन्यकावेषामनङ्गारातिभामिनीम् ।। ९६।।

दशाननां दशभुजां दशपादकुशेशयाम् ।
प्रणमामि महाकालीं महाकालमनोरमाम् ।। ९७।।

महिषं राक्षसाधीशं सर्वदेवमहोमयी ।
या जघानाम्बिका तस्यै भद्रकाल्यै नमो नमः ।। ९८।।

तदा विरहिता देवाः सर्वशक्तिमयि त्वया ।
ज्योत्स्नावियुक्तचन्द्राभामपर्णे के न भेजिरे ।। ९९।।

वाक् ते सरस्वती देवी कान्तिस्ते कमलालया ।
शक्तिस्ते परमा काली देवि त्वं त्रिगुणा ततः ।। १००।।

वाचा ते प्रमथाः सृष्टाः कान्त्याकृञ्ष्टाः सुरासुराः ।
शक्त्या विनिर्जितः शत्रुः भद्रकालि परात्परे ।। १०१।।

शक्तेरेव प्रधानत्वादङ्गत्वाद्भारतीश्रियोः ।
महामायावतारेषु गौरी महिषमर्दिनी ।। १०२।।

शक्तेरेव प्रधानत्वादङ्गत्वाद्भारतीश्रियोः ।
त्रिगुणापि पराशक्तिरुमेत्येवाभिधीयते ।। १०३।।

चण्डमुण्डाविनाशिन्यै जगदाज्ञाकरभ्रुवे ।
चामुण्डानामधारिण्यै कालिकायै नमो नमः ।। १०४।।

चण्डाद्महासशस्त्रायै शत्रुसन्तानमृत्यवे ।
शिवदूत्यभिधानायै परस्मै योषिते नमः ।। १०५।।

चामुण्डा तमसो भागो रजसः शिवदूतिका ।
सत्त्वस्य कौशिकी देवी सर्वलोकसवित्रि ते ।। १०६।।

शक्तित्रयांशजातापि गोकुलाधीशनन्दिनी ।
निद्राभागस्य मुख्यत्वात् कालिकेत्येव गीयते ।। १०७।।

कमलां तमसाश्लिष्टामवतीर्णां महीतले ।
नाशाय वैप्रचित्तानां भक्तानां कुशलाय च ॥१०८॥

देवीं योगीश्वरीं रक्तचामुण्डानामधारिणीम् ।
जनानां भजमानानां न क्वचिद्विद्यते भयम् ॥१०९॥

अनावृष्टिभयोद्विग्नी लोकसन्तापहारिणी ।
शताक्षी नम्यते दुर्गा दुर्गमासुरनाशिनी ॥११०॥

तपोधनकुलद्वेषियातुधानकुलान्तकृत् ।
एकवीराम्बिका भीमा कालरात्रिः प्रणम्यते ॥१११॥

रोदोविसारि झुङ्कारां असङ्ख्यभ्रमराकृतिम् ।
नम्याममरसङ्घेन रम्यां कादम्बिनीमिव ॥११२॥

अकालरात्रिं तन्वानां निहत्य रुचिमारुणीम् ।
नमामि भ्रामरीं देवीं अरुणासुरनाशिनीम् ॥११३॥

भूतेशदयिते मातः विश्वजालविमोहिनि ।
त्वं गीयसे मुनिवरैश्चेतना चेतनावताम् ॥११४॥

असि बुद्धिमतां बुद्धिः शक्तिः शक्तिमतामसि ।
असि क्षान्तिमतां क्षान्तिः शान्तिः शान्तिमतामसि ॥११५॥

असि दान्तिमतां दान्तिः कान्तिः कान्तिमतामसि ।
असि श्रद्धावतां श्रद्धा भक्तिर्भक्तिमतामसि ॥११६॥

असि तुष्टिमतां तुष्टिः पुष्टिः पुष्टिमतामसि ।
असि विद्यावतां विद्या कीर्तिः कीर्तिमतामसि ॥११७॥

असि नीतिमतां नीतिः धृतिर्धृतिमतामसि ।
असि स्मृतिः स्मृतिमतां दया चासि दयावताम् ।।११८।।

असि तृष्णावतां तृष्णा भ्रान्तिः भ्रान्तिमतामसि ।
निद्रासि सर्वभूतानां मायासि परमेष्ठिनः ।।११९।।

त्वं माता सर्वलोकानां त्वं धात्री भूतधारिणी ।
ह्रीमतां ह्रियमाहुस्त्वां त्वामाहुः श्रीमतां श्रियम् ।।१२०।।

।। इति श्रीभगवन्महर्षिरमणान्तेवासिनो वासिष्ठस्य
नरसिंहसूनोर्गणपतेः कृतिः देवीस्तोत्रमञ्जरी समाप्ता ।।

# श्रीत्रिपुरसुन्दरीगीतम्

सजलतोयदश्यामकुन्तला ।
कुन्दमालया रचितशेखरा ॥१॥

अमृतभानुना सरसिजेन च ।
तुलितमाननं मञ्जु बिभ्रती ॥२॥

चारुनासिकाभूषणत्विषा ।
चन्द्रिकाच्छया सह लसत् स्मिता ॥३॥

गण्डयुग्मके नातिशोभिना ।
पाण्डुपाण्डुनाऽऽराधितस्मरा ॥४॥

नीलनीरजच्छदविलोचना ।
श्रीयुगोपमश्रवणशालिनी ॥५॥

दर्पणाक्षिपद्भालभासुरा ।
लघुविशेषकं तत्र बिभ्रती ॥६॥

कुण्डलप्रभामण्डितांसका ।
पञ्चसायकोत्साहवर्धिनी ॥७॥

पल्लवाधरा शुक्लदन्तिका ।
फुल्लतां सदा बिभ्रती मुखे ॥८॥

चापसुन्दरारालझिल्लिका ।
अलसहासभाविजितमल्लिका ॥९॥

कम्बुकन्धरा कनकमालिनी ।
बिसनिभप्रभे बिभ्रती भुजे ॥१०॥

अरुणकञ्जभौ बिभ्रती करौ ।
तुङ्गपीवरस्तनविशोभिनी ॥११॥

सिंहमध्यमा निम्ननाभिका ।
मन्मथायुधद्रोमराजिका ॥१२॥

नागनासिका सुन्दरोरुका ।
चारुजङ्घिका कोमलाङ्घ्रिका ॥१३॥

सुमशराह्वयब्रह्मनिर्मिता ।
सालभञ्जिका जङ्गमा यथा ॥१४॥

सरसिजाटवीमध्यचारिणीम् ।
नाभिजन्मनश्चारुहासिनीम् ॥१५॥

पुष्पधन्विनः प्रियमृगीदृशम् ।
पाकशासनप्राणनायिकाम् ॥१६॥

उर्वशीमुखं सुरवधूजनम् ।
रूपसम्पदा जितवती सती ॥१७॥

त्रिपुरवैरिणो जीवितेश्वरी ।
त्रिपुरसुन्दरी ह्वहृदि चकास्तु मे ॥१८॥

॥ इति श्रीभगवन्महर्षिरमणान्तेवासिनो वासिष्ठस्य
नरसिंहसूनोर्गणपतेः कृतिः श्रीत्रिपुरसुन्दरीगीतं समा सम् ॥

# श्रीअमृताम्बापञ्चरत्नम्

भाग्येन भूमिभाजाममृताम्बा नाम बिभ्रती वसति ।
घटिकाचलस्य शिखरे दयिता दैत्यदलनस्य ॥ १॥

सुतरां करुणाकलितं विदधन्नरसिंहमानसं चलितम् ।
घटिकाचलेऽतिललितं किमपि परं दैवतं जयति ॥ २॥

अमृतं मुनीन्द्रमनसाममृतं नरसिंहनयनयुगलस्य ।
अमृतं कविरसनानां घटिकाद्रौ धाम परमस्ति ॥ ३॥

सेवितुमतीव योग्यं निगमागमवाक्यसञ्चयैर्मृग्यम् ।
तनुबद्धमक्षिभाग्यं नृहरेर्घटिकाचले जयति ॥ ४॥

निवसत्यमरेन्द्रसुन्दरी कबरीलालितपादधूलिका ।
नरकेसरिचित्तडोलिका घटिकाद्रौ जलराशिबालिका ॥ ५॥

॥ इति श्रीभगवन्महर्षिरमणान्तेवासिनो वासिष्ठस्य
नरसिंहसूनोर्गणपतेः कृतिः श्रीअमृताम्बापञ्चरत्नं समाप्तम् ॥

# श्रीसौन्दर्याम्बानिर्वाणषट्कम्

दुन्दुभिवर्षे वृषषष्ठदिने माधवकृष्णदलीयनवम्याम् ।
भार्गववासरनिशिशततारासंयुक्तायां प्रथमे यामे ॥१॥

भारद्वाजीपाराशर्यश्रेष्ठकुलोद्भवसुन्दरपत्नी ।
गुरुगुहभागजरमणमहर्षेर्माता पूता चारित्रेण ॥२॥

त्याजितमानससङ्गाहंसी शिवपदभक्तिक्षालितपङ्का ।
गुहकरशक्त्या रुद्धप्राणा तत्क्षणधूतसमस्तविकल्पा ॥३॥

निगमान्तवचो वेद्यं ज्योतिः सर्वजगत्सु व्याप्तं ज्योतिः ।
सुतगुहदृष्ट्या व्यक्तं ज्योतिः सौन्दर्याम्बासमभूत् ज्योतिः ॥४॥

रमणमहर्षेः करसरसीजद्वयमकरन्दस्फुटधारेव ।
अत्र समाधौ सौन्दर्याम्बादेव्यास्तीर्थं नवमघशमनम् ॥५॥

जयतु महर्षेर्माता पूता जयतु समाधिः कोपि तदीयः ।
जयतु महर्षिस्थापितलिङ्गं जयतु च तीर्थं नवमघशमनम् ॥६॥

॥ इति श्रीभगवन्महर्षिरमणान्तेवासिनो वासिष्ठस्य
नरसिंहसूनोर्गणपतेः कृतिः सौन्दर्याम्बानिर्वाणषट्कं समाप्तम् ॥

# रेणुकाषट्कम्

जयदेवसमूहनुते जमदग्निमुनेर्दयिते ।
जननं विबुधावनि ते जगतामुपकारकृते ।।१।।

विपिने विपिने विनुता नगरे नगरे नमिता ।
जयति स्थिरचित्तहिता जमदग्निमुनेर्वनिता ।।२।।

मतिकैरविणीन्दुकला मम हृत्कमले कमला ।
जयति स्तुतिदूरबला जमदग्निवधूर्विमला ।।३।।

कलिपक्षजुषां दमनी कलुषप्रततेःशमनी ।
जयति स्तुवतामवनी जगतामवतुर्जननी ।।४।।

निखिलामयतापहरी निजसेवकभव्यकरी ।
जमदग्निनदोपझरी जयतीश्वरचिल्लहरी ।।५।।

सकलामयनाशचणे सततं स्मरतः सुगुणे ।
मम कार्यगतेः प्रथमं मरणं न भवत्वधमम् ।।६।।

।। इति श्रीभगवन्महर्षिरमणान्तेवासिनो वासिष्ठस्य
नरसिंहसूनोर्गणपतेः कृतिः रेणुकाषट्कम् समाप्तम् ।।

# रेणुकासप्तकम्

पुरतो विलोक्य वृषभं पार्श्वे लिङ्गं परात्परस्य विभोः ।
पृष्ठे स्कन्दगणेशौ त्वां कालीं मन्महे मातः ॥ १॥

न त्वं लक्ष्मीमातः यल्लक्ष्मीनायकस्य माताऽसि ।
जनयित्रि राक्षसारेः तस्मात्त्वां मन्महे कालीम् ॥ २॥

संहारनायिकात्वात् मारीत्वादुग्रवेषरूपत्वात् ।
मध्यमलोकनिवासात् त्वां कालीं मन्महे मातः ॥ ३॥

जमदग्निः शिवभागः भागस्त्वं देवि शैलकन्यायाः ।
एवं ज्ञात्वा यस्त्वां भजति स धन्यो महाभागः ॥ ४॥

त्वां चण्डिकां प्रचण्डामाहुस्तन्त्राणि जनिमतां मातः ।
तस्मात्त्वं शिवकान्ता न श्रीर्न प्रेयसी च विधेः ॥ ५॥

गौरीश्रीर्वा वाग्वा न विशेषो जगति भक्तलोकस्य ।
मम तु विशिष्टा गौरी साक्षादस्याः सुतो यदहम् ॥ ६॥

तिसृषु परदेवतासु श्रेष्ठत्वं नोच्यते मयैकस्याः ।
प्रीतिर्मे गिरिजायां लक्ष्मीतो भारतीतश्च ॥ ७॥

॥ इति श्रीभगवन्महर्षिरमणान्तेवासिनो वासिष्ठस्य
नरसिंहसूनोर्गणपतेः कृतिः रेणुकासप्तकं समाप्तम् ॥

# इन्द्राणीसप्तशती

## प्रथमं गायत्रं शतकम्

### प्रथमः शशिवदनापादः

हरिललने मे पथि तिमिराणि ।
हरदरहासद्युतिभिरिमानि ।।१।।

अगतिमवीर्यामपगतधैर्याम् ।
अवतु शची मे जनिभुवमार्याम् ।।२।।

शृणु करुणावत्यलघुमखर्वे ।
स्तवमहमार्यस्तव शचि कुर्वे ।।३।।

त्रिजगदतीतो विलसति नित्यः ।
अणुरणुतो यो भगवति सत्यः ।।४।।

त्वमखिलकार्येष्वयि धृतसक्तिः ।
उरुगतिरस्य प्रभुतमशक्तिः ।।५।।

विदुरिममेके जगति महेन्द्रम् ।
जगुरयि केचिज्जननि महेशम् ।।६।।

अवगतवेदो वदति महेन्द्रम् ।
परिचिततन्त्रो भणति महेशम् ।।७।।

जननि शचि त्वं प्रथमदलस्य ।
भगवति दुर्गास्यपरदलस्य ॥८॥

न शचि शिवातस्त्वमितरदैवम् ।
बहुमुनिवाणीसमरसतैवम् ॥९॥

दिवि च सिताद्रौ शचिवपुषोर्वाम् ।
पृथगुपलम्भादयि भिदयोक्तिः ॥१०॥

तनुयुगमूलं वपुरतिमायम् ।
करचरणाद्यैर्वियुतममेयम् ॥११॥

त्वमुदरवर्तित्रिभुवनजीवा ।
भवसि शची सा जननि शिवा वा ॥१२॥

विभुशुचिकीलाततिरयि धूमम् ।
त्वममरमार्गं बत वमसीमम् ॥१३॥

जयसि नभस्थो जननि परस्तात् ।
नभसि च भान्ती भवसि पुरस्तात् ॥१४॥

त्वमतनुरम्ब ज्वलसि परस्तात् ।
इह खशरीरा लससि पुरस्तात् ॥१५॥

जननि परस्तान्मतिरसि भर्तुः ।
असि खशरीरा पृथगवगन्त्री ॥१६॥

अणुचयरूपं भगवति शान्तम् ।
न भवति शून्यम् तदिदमनन्तम् ॥१७॥

दिवि दधतीशे पुरुषशरीरम् ।
जननि पुरन्ध्री तनुरभवस्त्वम् ।।१८।।

दृशि विलसन्तं प्रभुमुपयान्ती ।
भवसि विराट् त्वं नृतनुषु भान्ती ।।१९।।

तव गुणगानं जननि विधातुम् ।
भवति पटुः को वियदिव मातुम् ।।२०।।

भगवति तृप्तिर्भवतु न वा ते ।
अभिलषिताप्तिर्भवतु न वा मे ।।२१।।

भजति तवाङ्घ्रिं मम खलु भाषा ।
पति मनुरागात् प्रियमिव योषा ।।२२।।

अघमपहर्तुं शुभमपि कर्तुम् ।
अलमजरे ते गुणगणगानम् ।।२३।।

अवसि जगत्त्वं कुलिशिभुजस्था ।
अव मुनिभूमिं गणपतिधीस्था ।।२४।।

शशिवदनाभिर्गणपतिजाभिः ।
शशिवदनाद्या परिचरिताऽस्तु ।।२५।।

## द्वितीयस्तनुमध्यापादः

ध्वान्तं परिहर्तुं तेजांस्यपि भर्तुम् ।
अन्तर्जगदम्बा हासं कुरुतान्मे ।।२६।।

भीतामरिधूतामार्यावनिमेताम् ।
सम्राज्ञि बुधानां दूनामव दीनाम् ।। २७।।

ईशस्य सहायां विश्वस्य विधाने ।
आकाशशरीराम्बां प्रणमामः ।। २८।।

कर्तुर्भुवनानां मायासि शचि त्वम् ।
सत्यस्य तपोऽसि ज्ञस्यासि मनीषा ।। २९।।

आज्ञासि विनेतुस्तेजोऽसि विभातः ।
निर्यत्नसमाधेरानन्दरसोऽसि ।। ३०।।

तस्य त्वमनन्याऽप्यन्येव खकाया ।
अत्यद्भुतमाया जायाऽसि सहाया ।। ३१।।

आकाशशरीरां जायामशरीरः ।
आलिङ्ग्य विभुस्त्वां नन्दत्ययि चित्रम् ।। ३२।।

वज्रेश्वरि घस्रे यद्वन्मुकुटेन ।
दीप्तेन सवित्रा मूर्धा तव भाति ।। ३३।।

नक्षत्रसहस्रैश्शुभ्रद्युतिभिस्ते ।
पुष्पायितमेतैर्मातर्निशिमस्ते ।। ३४।।

घस्रः खलु कालो राज्यं ननु कर्तुम् ।
रात्रिः खलु कालो रन्तुं रमणेन ।। ३५।।

निःशब्दतरङ्गास्वग्लौषु निशासु ।
नूनं खशरीरे कान्तं रमयन्ती ।। ३६।।

सान्द्रोडुसुमस्त्रग्विभ्राजितकेशा ।
ध्वान्तासितचेला शान्ताऽप्यसि भीमा ॥ ३७॥

राजन्मितताराममन्दारवतंसाम् ।
मातस्स्मितभासा स्मेरां हसितेन ॥ ३८॥

ज्योत्स्ना घनसारद्रावैरनुलिप्ताम् ।
त्वां वीक्ष्य न शान्तिः कस्य क्षणदासु ॥ ३९॥

बालारुणरोचिः काश्मीररजोभिः ।
आलिप्तमुखीं त्वां प्रातः प्रणमामि ॥ ४०॥

सायं समयश्री लाक्षारसरक्तम् ।
प्रत्यक् प्रसृतं ते वन्दे वरदेऽङ्घ्रिम् ॥ ४१॥

दीप्तार्ककिरीटां सर्वान् विनयन्तीम् ।
वन्दे भुवनानां राज्ञीमसमानाम् ॥ ४२॥

धूताखिलरोगाः श्वासास्तव वाताः ।
मातर्वितरन्तु प्राणस्य बलं नः ॥ ४३॥

प्राञ्चस्तव वाताः श्वासाः शमुशन्तु ।
प्रत्यञ्च इमे नः पापं शमयन्तु ॥ ४४॥

मन्मातरवाञ्चो वीर्यं वितरन्तु ।
सन्तापमुदञ्चः सर्वं च हरन्तु ॥ ४५॥

अस्या इव भूमेर्भूतप्रसवायाः ।
एकैकश आहुर्येषां महिमानम् ॥ ४६॥

अद्रेरुपलानां नद्याः सिकतानाम् ।
येषां च न कश्चिच्छक्तो गणनायाम् ।। ४७।।

रोमायितमेतैर्गोलैस्तव काये ।
व्याख्यातमनेन श्लाघ्यं तव भाग्यम् ।। ४८।।

विश्वं वहसीदं जम्भारिभुजस्था ।
आर्यान्वहमातर्वासिष्ठमतिस्था ।। ४९।।

आद्यां भुवनानां भर्तुस्तनुमध्याम् ।
भक्तस्य भजन्तामेतास्तनुमध्याः ।। ५०।।

## तृतीयो मुकुलपादः

हासाः शक्रगृहेश्वर्याश्चन्द्ररुचः ।
भूयासुर्विमलप्रज्ञायै हृदि मे ।। ५१।।

इन्द्राण्याः करुणा लोकाश्शोकहृतः ।
भूयासुर्भरतक्ष्मायै क्षेमकृतः ।। ५२।।

व्यक्तिर्व्योमतनुः शक्तित्वाद्वनिता ।
ज्ञातृत्वात्पुरुषः केषाञ्चिद्विदुषाम् ।। ५३।।

व्यक्तिं व्योमतनुं ये प्राहुः पुरुषम् ।
तेषां तत्त्वविदां कल्पस्स्यात् त्रिविधः ।। ५४।।

रुद्रं केऽपि जगुः शक्रं केऽपि विदुः ।
भाषन्ते भुवनप्राणं केऽपि विदः ।। ५५।।

व्यक्तिं व्योमतनुं प्राहुर्ये वनिताम् ।
तेषां च त्रिविधः कल्पश्शास्त्रविदाम् ॥ ५६॥

दुर्गा सूरिवरैः कैश्चित्सा गदिता ।
शच्यन्यैर्विबुधैर्ज्ञैरन्यैरदितिः ॥ ५७॥

एकेषां विदुषां व्यक्तिर्व्योमतनुः ।
न स्त्री नो पुरुषो ब्रह्मैतत्सगुणम् ॥ ५८॥

त्वं विश्वस्य महान् प्राणः कः परमे ।
त्वं रुद्रः प्रणवस्त्वं शक्रोऽभ्रशिखी ॥ ५९॥

त्वं कस्यास्यदितिस्त्वं रुद्रस्य शिवा ।
त्वं शक्रस्य शची शक्तिर्देवनुते ॥ ६०॥

प्राणश्च प्रणवो ज्योतिश्चाम्बरगम् ।
वस्त्वेकं त्रिगुणं नो वस्तु त्रितयम् ॥ ६१॥

शक्तेरम्बपरे शक्तस्यापि भिदा ।
ज्वाला पावकवद्भाषा भेदकृता ॥ ६२॥

सर्वं दृश्यमिदं भुञ्जाने परमे ।
पुंनामस्तुतयो युज्यन्ते खलु ते ॥ ६३॥

कुर्वाणेम्बसतस्सन्तोषं सततम् ।
स्त्रीनामस्तुतयः शोभां ते दधते ॥ ६४॥

सद्ब्रह्म ब्रुवते विद्वांसो विगुणम् ।
त्वं मातस्सगुणं ब्रह्मासि प्रथिते ॥ ६५॥

शब्दाद्यैर्वियुतं सद्ब्रह्मामलिनम् ।
शब्दाद्यैः सहिता त्वं देव्यच्छहिता ।। ६६।।

साक्षि ब्रह्म परं त्वं मातः कुरुषे ।
सर्वेषां जगतां कार्यं सर्वविधम् ।। ६७।।

द्यौर्माता जगतो द्यौरेवास्य पिता ।
व्याप्तं भाति जगद्द्यावा सर्वमिदम् ।। ६८।।

आकाशाद्रजसो द्यौरन्या विरजाः ।
आकाशेऽस्ति पुनस्तत्पारे च परा ।। ६९।।

द्यावं तां जगतो रङ्गे व्योमतनुम् ।
पारे शुद्धतमां विद्मस्त्वां परमे ।। ७०।।

त्वां पूर्णामदितिं शक्तिं देवि शचीम् ।
नित्यं शब्दवतीं गौरीं प्रब्रुवते ।। ७१।।

पुंनामा भवतु स्त्रीनामास्त्वथवा ।
व्यक्तिर्व्योमतनुर्लोकं पात्यखिलम् ।। ७२।।

नाके सा किल भात्यैन्द्री राज्यरमा ।
बिभ्राणा ललितं स्त्रीरूपं परमा ।। ७३।।

शक्तां देवि विधेह्यार्तानामवने ।
इन्द्रस्येव भुजां वासिष्ठस्य मतिम् ।। ७४।।

पूजाशक्रतरुण्यैतैस्सिध्यतु ते ।
गातॄणां वरदे गायत्रैर्मुकुलैः ।। ७५।।

## चतुर्थो वसुमतीपादः

मोहं परिहरन् योगं वितनुताम् ।
देवेन्द्रदयिता हासो मम हृदि ॥ ७६॥

आभातु करुणा सा भारतभुवि ।
सुत्रामसुदृशो यद्वन्निजदिवि ॥ ७७॥

वन्दारुजनतामन्दारलतिकाम् ।
वन्दे हरिहयप्राणप्रियतमाम् ॥ ७८॥

शोकस्य दमनीं लोकस्य जननीम् ।
गायामि ललितां शक्रस्य दयिताम् ॥ ७९॥

रम्या सुमनसां भूपस्य महिषी ।
सौम्या जनिमतां माता विजयते ॥ ८०॥

वीर्यस्य च धियस्त्रैलोक्यभरणे ।
दात्री मघवते देवी विजयते ॥ ८१॥

व्याप्ता जगदिदं गुप्ता हृदि नृणाम् ।
आप्ता सुकृतिनां दैवं मम शची ॥ ८२॥

खे शक्तिरतुला पारे चिदमला ।
स्वश्चारुमहिला दैवं मम शची ॥ ८३॥

शस्त्रं मघवतः शास्त्रं यमवताम् ।
वस्त्रं त्रिजगतो दैवं मम शची ॥ ८४॥

युक्तस्य भजतः शर्मान्तरतुलम् ।
वर्मापि च बहिर्दैवं मम शची ॥ ८५॥

वीर्यं बलवतां बुद्धिर्मतिमताम् ।
तेजो द्युतिमतां दैवं मम शची ॥ ८६॥

एकैव जनयन्त्येकैव दधती ।
एकैव लयकृद्दैवं मम शची ॥ ८७॥

शक्तीरवितथाः क्षेत्रेषु दधती ।
बीजेषु च परा दैवं मम शची ॥ ८८॥

चिन्वन्त्यपि पचन्त्येका पशुगणम् ।
खादन्त्यपि भवे दैवं मम शची ॥ ८९॥

दृष्टौ धृतचितिर्दृश्ये ततगुणा ।
विश्वात्ममहिषी दैवं मम शची ॥ ९०॥

राकाशशिमुखी राजीवनयना ।
स्वः कापि ललना दैवं मम शची ॥ ९१॥

स्थाणावपि चरे सर्वत्र वितता ।
साक्षाद्भवतु मे स्वर्नाथदयिता ॥ ९२॥

यन्मातरनृतं ध्यातं च गदितम् ।
जुष्टं च हर मे तद्देवि दुरितम् ॥ ९३॥

मां मोचय ऋणादिन्द्राणि सुभुजे ।
मामल्पमतयो मा निन्दिषुरजे ॥ ९४॥

शत्रुश्च शचि मे सख्याय यतताम् ।
दृप्तश्च मनुजो मामम्ब भजताम् ।।९५।।

कष्टं शचि विधूयेष्टं विदधती ।
आनन्दय जनं प्रेयांसमयि मे ।।९६।।

अस्त्रं मम भव ध्वंसाय रटताम् ।
सुत्रामरमणि श्रीमातरसताम् ।।९७।।

सम्पूरयतु मे सर्वं सुरनुता ।
स्वर्गक्षितिपतेश्शुद्धान्तवनिता ।।९८।।

संवर्धय शचि स्वं देशमवितुम् ।
बाहोरिव हरेर्बुद्धेर्मम बलम् ।।९९।।

एतैर्वसुमतीवृत्तैर्नवसुमैः ।
भूयाच्चरणयोः पूजा जननि ते ।।१००।।

।। प्रथमं गायत्रं शतकं समाप्तं ।।

# अथ द्वितीयमौष्णिहं शतकम्

## प्रथमः कुमारललितापादः

सुरेश्वरमहिष्याः स्मितं शशिसितं मे ।
तनोतु मतिमच्छां करोतु बलमग्र्यम् ॥१०१॥

विधाय रिपुधूतिं निधाय सुदशायाम् ।
पुलोमतनुजाता धिनोतु भरतक्ष्माम् ॥१०२॥

पदप्रणतरक्षा विधानधृतदीक्षा ।
जगद्भरणदक्षा परा जयति शक्तिः ॥१०३॥

स्वरत्यविरतं सा शनैर्नभसि रङ्गे ।
ज्वलत्यधिकसूक्ष्मं जगत्प्रभवशक्तिः ॥१०४॥

महस्तव सुसूक्ष्मं निदानमखिलानाम् ।
भवत्यखिलमातर्जगत्यनुभवानाम् ॥१०५॥

जनन्यनुभवानां मतित्वपरिणामे ।
स्वरो भवति मूलं तवाभ्रहयरामे ॥१०६॥

य ईश्वरि निदानं समस्तमतिभाने ।
स्वरो गतिविशेषात्स एव खलु कालः ॥१०७॥

ज्वलन्त्यभिहिता त्वं विहायसि विशाले ।
प्रचण्डपदपूर्वा प्रपञ्चकरिचण्डी ॥१०८॥

स्वरन्त्यखिलबुद्धिप्रदा भवसि गौरी ।
त्रिकालतनुरम्ब स्मृता त्वमिह काली ॥१०९॥

महस्स्वर इतीदं द्वयं तदतिसूक्ष्मम् ।
महेश्वरि तवांशद्वयं परममुक्तम् ॥११०॥

महोऽतिशयमाप्तं त्वयि त्रिदिवगायाम् ।
स्वरोऽतिशयमाप्तः सिताद्रिनिलयायाम् ॥१११॥

दिवं नयति पूर्वा भुवं युवतिरन्या ।
द्वयोः प्रकृतिरभ्रं विशालमतिमान्या ॥११२॥

न ते दिवि लसन्त्याः पिता तनुभृदन्यः ।
स्वयं भुवमिमां त्वां सतामवनि विद्मः ॥११३॥

सुरारिकुलजन्मा तवेश्वरि पुलोमा ।
पितेति कविभाषा परोक्षगतिरेषा ॥११४॥

वदन्त्यसुरशब्दैर्घनं सजलमेतम् ।
पुलोमपदमेकं पुराणसतितेषु ॥११५॥

प्रकृष्टतरदीप्तिर्गभीरतरनादा ।
इतो हि भवसि त्वं तटित्तनुरमेये ॥११६॥

अरातिरसुरोऽयं विभोर्निगदितस्ते ।
हयश्च बतगीतः पिता तव पयोदः ॥११७॥

प्रियैः किल परे वां परोक्षवचनौघैः ।
प्रतारितमिवेला जगन्मुनिगणेन ॥११८॥

निकृष्टमपि रम्यं यदि त्रिदिवलोके ।
तवाम्ब किमु वाच्या रुचिस्त्रिदिवनाथे ॥११९॥

त्वमम्ब रमणीया वधूस्त्वमिव नाके ।
त्वया क इव तुल्यां मृदो वदतु लोके ॥१२०॥

विनीलमिव खांशं विदुस्त्रिदिवमेके ।
परस्तु वदसि स्वः कविः कमलबन्धुम् ॥१२१॥

अमुत्रगतशोके महामहसि नाके ।
नमाम्यधिकृतां तां पुराणकुलकान्ताम् ॥१२२॥

यदा ममुतपक्वं मदीयमघमुग्रम् ।
तदिन्द्रकुलकान्ते निवारय समग्रम् ॥१२३॥

ददातु भरतक्ष्माविषादहरणाय ।
अलं बलमुदारा जयन्तजननी मे ॥१२४॥

अतीव ललिताभिः कुमारललिताभिः ।
इमाभिरमरेशप्रिया भजतु मोदम् ॥१२५॥

## द्वितीयो मदलेखापादः

पौलोम्याः परिशुभ्रज्योत्स्नादृश्यरुचो मे ।
श्रीमन्तो दरहासाः कल्पन्तां कुशलाय ॥१२६॥

कारुण्यामृतसिक्ता शक्ता शक्रमहिष्याः ।
प्रेक्षा भारतभूमेर्दौर्बल्यं विधुनोतु ॥१२७॥

वन्दे निर्जरराज्ञीं सङ्कल्पे सति यस्याः ।
साध्यासाध्यविचारो नैव स्यादणुकोऽपि ॥१२८॥

सङ्कल्पस्तव कश्चिच्चित्ते चेद्दिव ईशे ।
स्यादुल्लङ्घ्य निसर्गं सिद्धिर्निष्फलता च ॥१२९॥

मूढोऽप्युत्तमरीत्या सिध्येदध्ययनेषु ।
मेधावी च नितान्तं नैव स्यात्कृतकृत्यः ॥१३०॥

उत्पद्येत महेश्वर्यप्राज्ञादपि शास्त्रम् ।
यायान्मातरकस्माद्विभ्रान्तिं विबुधोऽपि ॥१३१॥

अल्पानामबलानां सङ्ग्रामे विजयः स्यात् ।
शक्तानां बहुलानां घोरा स्यात्परिभूतिः ॥१३२॥

राजेरन्नृपपीठेष्वख्यातानि कुलानि ।
स्याद्दुर्धर्षबलानां पातो राजकुलानाम् ॥१३३॥

निर्यत्नोऽपि समाधेर्विन्देद्देवि समृद्धिम् ।
योगस्याम्ब न पश्येदभ्यस्यन्नपि सिद्धिम् ॥१३४॥

अत्यन्तं यदसाध्यं नेदिष्ठं भवतीदम् ।
साध्यं सर्वविधाभिः स्यादिन्द्राणि दविष्ठम् ॥१३५॥

गायामो मुनिसङ्घैर्गेयां कामपि मायाम् ।
इन्द्रस्यापि विनेत्रीं त्रैलोक्यस्य च धात्रीम् ॥१३६॥

विद्यानामधिनाथे कां विद्यां श्रयसे त्वम् ।
इन्द्रं कर्तुमधीनं विश्वस्मादधिकं तम् ॥१३७॥

नित्यालिप्तमनीषे स्त्रीमोहो न वितर्क्यः ।
भ्रूचेष्टानुचरत्वादन्या स्यादनुकम्पा ॥१३८॥

सौन्दर्यं परमन्यद्वज्रेश्वर्यथवा ते ।
हर्तुं यत्सुखमीष्टे तादृक्तस्य च चित्तम् ॥१३९॥

चक्षुर्दर्शनमात्रान्निस्तेजो विदधानम् ।
चित्तं चोज्झितधैर्यं मत्तानां दनुजानाम् ॥१४०॥

गर्ते दुर्जनदेहे मग्नान् पङ्कविलग्नान् ।
प्राणानात्मसजातीनुद्धर्तुं धृतदीक्षम् ॥१४१॥

वज्रं निर्जरराजो यद्धत्ते समरेषु ।
त्वच्छक्तेः कलयैतन्मन्मातर्निरमायि ॥१४२॥

राज्ञीत्वात्परमेते राजत्वं शतमन्योः ।
निश्शक्तिस्स विना त्वां कामाज्ञां कुरुतां नः ॥१४३॥

सर्वं शक्रनिशान्तस्येशाने तव हस्ते ।
अस्माकं तु धियेदं स्तोत्रं सङ्ग्रहतस्ते ॥१४४॥

गन्तव्यं स्वरधीशे निश्शेषार्पणशूरम् ।
बिभ्राणा नयसि त्वं मार्जालीव किशोरम् ॥१४५॥

गृह्णन्नम्बरनाथामम्बामश्लथमन्धः ।
कीशस्येव किशोरो योगी गच्छति गम्यम् ॥१४६॥

पूर्णात्मार्पणहीनोऽप्यज्ञाताऽपि समाधेः ।
नित्यं यो जगदम्ब त्वां सेवेत जपाद्यैः ॥१४७॥

तं चाचञ्चलभक्तिं कृत्वा पूरितकामम् ।
निष्ठां दास्यसि तस्मै पौलोमि क्रमशस्त्वम् ।।१४८।।

भिन्नां सङ्घसहस्रैः खिन्नां शत्रुभरेण ।
पातुं भारतभूमिं मातर्देहि बलं मे ।।१४९।।

त्रैलोक्यावनभारश्रान्तां वासवकान्ताम् ।
हैरम्ब्यो मदलेखाः सम्यक् सम्मदयन्तु ।।१५०।।

## तृतीयो हंसमालापादः

सुरुचिर्वज्रपाणेस्सुदृशो मन्दहासः ।
हरतान्मोहमूलं हृदयस्थं तमो मे ।।१५१।।

अमृतं सङ्किरन्त्या प्रसरन्त्येह दृष्ट्या ।
सुरराज्ञी बलाढ्यां भरतक्ष्मां करोतु ।।१५२।।

अमृताम्भः किरन्ती करुणाम्भो वहन्ती ।
नतरक्षात्तदीक्षा शचि मातस्तवेक्षा ।।१५३।।

कृतपीयूषवृष्टिस्तितकल्याणसृष्टिः ।
विहितैनोविनष्टिर्धृतविज्ञानपुष्टिः ।।१५४।।

भृतदेवेन्द्रतुष्टिर्यमिनां देवगृष्टिः ।
मम काम्यानि देयात्तव विश्वाम्ब दृष्टिः ।।१५५।।

जगतां चक्रवर्तिन्यसितस्ते कटाक्षः ।
जलदो भक्तिभाजां शिखिनां नर्तनाय ।।१५६।।

सुकृती कोऽपि नाट्ये बहुले तत्र मातः ।
जगते सारभूतानुपदेशान्करोति ॥१५७॥

अपरो नव्यकाव्यान्यनवद्यानि धन्यः ।
विदधात्यप्रयत्नाद्बुधभोगक्षमाणि ॥१५८॥

इतरो भाग्यशाली रमणीयैः प्रसङ्गैः ।
वितनोति स्वजातिं जगति श्रेष्ठनीतिम् ॥१५९॥

जगतां मातरेको महसा पुण्यशाली ।
विधुतारिः स्वदेशं कुरुते वीतपाशम् ॥१६०॥

पर इन्द्राणि साधुर्बत विस्मृत्य विश्वम् ।
रमते सिक्तगण्डः प्रमदाश्रुप्रदानैः ॥१६१॥

तव रागार्द्रदृष्ट्या दिवि शक्रस्य नाट्यम् ।
करुणासिक्तदृष्ट्या भुवि भक्तस्य नाट्यम् ॥१६२॥

तव सप्रेमदृष्टिर्बलमिन्द्रे दधाति ।
तव कारुण्यदृष्टिर्बलमस्मासु धत्ताम् ॥१६३॥

तव वामाः कटाक्षाः प्रभुमानन्दयन्तु ।
उचितो दक्षिणानामयमस्त्वीक्षणानाम् ॥१६४॥

सुकृतानां प्रपोषं दुरितानां विशोषम् ।
करुणार्द्रा विभान्ती तव दृष्टिः क्रियान्नः ॥१६५॥

कुरु पादाब्जबन्धोः सरणिं निस्तमस्काम् ।
शचि विज्ञानतेजः किरतावीक्षितेन ॥१६६॥

क्रिययाराधयन्तो भुवने ते विभूतीः ।
इह केचिल्लभन्ते तव मातः कटाक्षान् ॥१६७॥

स्फुटविज्ञानपूर्वं प्रभजेरन् यदि त्वाम् ।
स्थिरया देवि भक्त्या किमु वक्तव्यमीशे ॥१६८॥

कुविधेर्विस्मरन्ती भरतक्ष्मा शचि त्वाम् ।
बहुकालादभाग्ये पतिता देव्ययोग्ये ॥१६९॥

अभिषिक्तस्य माता तव तेजोंशभूता ।
सुदशां सेवमानामनयत्पश्चिमाशाम् ॥१७०॥

अयि कालं कियन्तं दयसे पश्चिमस्याम् ।
इत इन्द्राणि पूर्वामवलोकस्व दीनाम् ॥१७१ ॥

न वयं पश्चिमस्याश्शचि याचामनाशम् ।
कृपयैतां च पूर्वां निहताशामवाशाम् ॥१७२॥

सकलं व्यर्थमासीदयि दीनेषु दृष्टा ।
तव विश्वस्य मातः करुणैकावशिष्टा ॥१७३॥

सुरराजस्य कान्ते नरसिंहस्य सूनुम् ।
बलवन्तं कुरु त्वं भरतक्ष्मावनाय ॥१७४॥

रुचिराभिर्निजाभिर्गतिभिर्हर्षयन्तु ।
मरुतां भर्तुरितास्तरुणीं हंसमालाः ॥१७५॥

## चतुर्थो मधुमतीपादः

दिशि दिशि प्रसरद्रुचितमोदमनम् ।
हरतु मे दुरितं हरिवधूहसितम् ।।१७६।।

हरतु दुःखभरप्रसृतमश्रुजलम् ।
भरतभूसुदृशो बलजितो रमणी ।।१७७।।

अतितरां महिता सुरपतेर्वनिता ।
करुणया कलिता मम शची शरणम् ।।१७८।।

त्रिभुवनक्षितिराड्भुवनभूषणभा ।
अखिलभासकभा मम शची शरणम् ।।१७९।।

सततयुक्तसुधीहृदयदीपकभा ।
निखिलपाचकभा मम शची शरणम् ।।१८०।।

रविविरोचकभा शशिविराजकभा ।
भगणशोभकभा मम शची शरणम् ।।१८१।।

गगनखेलकभा सकलचालकभा ।
अभयदाऽतिशुभा मम शची शरणम् ।।१८२।।

रुचिलवङ्गतया यदनघांशुनिधेः ।
हृततमोभवनं भवति दीपिकया ।।१८३।।

स्फुरति चारु यतः किरणमेकमिता ।
जलदसौधतले मुहुरियं चपला ।।१८४।।

भवति यद्द्युतितः कमपि भागमितः ।
पविररातिहरः प्रहरणेशपदम् ।।१८५।।

भवति यत्सुरुचेरणुतमांशमिता ।
युवमनोमदनी सुवदनास्मितभा ।।१८६।।

विततसूक्ष्मतनुर्महति सा गगने ।
परमपूरुषभा मम शची शरणम् ।।१८७।।

अमरनाथसखी रुचिनिधानमुखी ।
अमृतवर्षकदृङ्‌ मम शची शरणम् ।।१८८।।

अविधवा सततं युवतिरेव सदा ।
अनघवीरसुता मम शची शरणम् ।।१८९।।

अमृतवत्यधरे सुरधरापतये ।
चरणयोर्भजते मम शची शरणम् ।।१९०।।

स्मितलवेषु सिता शिरसिजेष्वसिता ।
चरणयोररुणा बहिरपि त्रिगुणा ।।१९१ ।।

कपटचन्द्रमुखी प्रकृतिरिन्द्रसखी ।
मृतिजरारहिता मम शची शरणम् ।।१९२ ।।

कृशतमेप्युदरे त्रिभुवनं दधती ।
जनिमतां जननी मम शची शरणम् ।।१९३ ।।

स्थिरतरा मनसि स्थिरतमा वचसि ।
नयनयोस्तरला मम शची शरणम् ।।१९४।।

मृदुतरा करयोर्मृदुतमा वचसि ।
भुजबले कठिना मम शची शरणम् ।।१९५।।

मृदुलबाहुलताऽप्यमितभीमबला ।
असुरदर्पहरी मम शची शरणम् ।।१९६।।

अबलयाऽपि यया न सदृशोऽस्ति बले ।
जगति कश्चिदसौ मम शची शरणम् ।।१९७।।

अतितरां सदया पदरते मनुजे ।
खलजने परुषा मम शची शरणम् ।।१९८।।

गणपतिं कुरुताद्भरतभूम्यवने ।
अमरभूमिपतेः प्रियतमा सबलम् ।।१९९।।

मधुरशब्दततीर्मधुमतीरजरा ।
गणपतेश्शृणुयात्सुरपतेस्तरुणी ।।२००।।

।।द्वितीयमौष्णिहं शतकं समाप्तं ।।

# अथ तृतीयमानुष्टुभं शतकम्

## प्रथमः पथ्यावक्त्रपादः

हसितं तन्महाशक्तेरस्माकं हरतु भ्रमम् ।
यत एव महच्चित्रं विश्वमेतद्विजृम्भते ।। २०१।।

राजन्ती सर्वभूतेषु सर्वावस्थासु सर्वदा ।
माता सर्गस्य चित्पायात् पौलोमी भारतक्षितिम् ।। २०२।।

धर्मिज्ञानं विभोस्तत्त्वं धर्मो ज्ञानं सवित्रि ते ।
व्यवहृत्यै विभागोऽयं वस्त्वेकं तत्त्वतो युवाम् ।। २०३।।

इन्द्रेशवासुदेवाद्यैः पदैः सङ्कीर्त्यते विभुः ।
शची शिवा महालक्ष्मीप्रमुखैर्भवती पदैः ।। २०४।।

अन्तरं वस्तुनो ज्ञातृ तच्छक्तं परिचक्षते ।
शाखाः समन्ततो ज्ञानं शक्तिं सङ्कीर्तयन्ति ताम् ।। २०५।।

अन्तरस्य च शाखानामैक्यं निर्विषयस्थितौ ।
विषयग्रहणेष्वेव सविभागः प्रदृश्यते ।। २०६।।

स्यादेवं विषयापेक्षी शाखानामन्तरस्य च ।
अविभक्तैकरूपाणां विभागो हरितामिव ।। २०७।।

लक्ष्यमन्तर्वयं चक्रे ध्यायामो यत्र निष्ठिताः ।
अन्तरीभावतस्तस्य नान्तरं तु विलक्षणम् ।। २०८।।

अहङ्कृतेर्वयं नान्ये यत्राहङ्कृतिसम्भवः ।
सम्पद्येतान्तरं तत्र ज्ञानस्य ज्ञातृतावहम् ॥ २०९॥

अन्तरावर्तभूयस्त्वादेकस्मिन् बोधसागरे ।
बोद्धारो बहवोऽभूवन् वस्तु नैव तु भिद्यते ॥ २१०॥

चिद्रूपे मातरेवं त्वं परस्माद्ब्रह्मणो यथा ।
न देवि देवतात्मभ्यो जीवात्मभ्यश्च भिद्यसे ॥ २११॥

समस्तभूतबीजानां गूढानामन्तरात्मनि ।
तवोद्गारोऽयमाकाशो मातस्सूक्ष्मरजोमयः ॥ २१२॥

न सर्वभूतबीजानि वस्तूनि स्युः पृथक् पृथक् ।
त्वयि प्रागविभक्तानि बभूवुरिति विश्रुतिः ॥ २१३॥

यथाम्बस्मृतिबीजानां प्रज्ञायामविशेषतः ।
तथा स्याद्भूतबीजानामविभक्तस्थितिस्त्वयि ॥ २१४॥

नाणूनि भूतबीजानि प्राक्सर्गात्त्वयि संस्थितौ ।
चितिशक्त्यात्मकान्येव निराकाराणि सर्वथा ॥ २१५॥

अनादि चेदिदं विश्वं स्मरण्णात्तव सर्जनम् ।
सादि चेदादिमः सर्गो वक्तव्यस्तव कल्पनात् ॥ २१६॥

विधातुं शक्नुयात्संविदभूतस्यापि कल्पनम् ।
कल्पितस्यैकदा भूयः सर्जनावसरे स्मृतिः ॥ २१७॥

चितेरस्मादृशां वीर्यं स्वप्ने चेद्विश्वकारणम् ।
चितेस्समष्टिभूतायाः प्रभावे संशयः कुतः ॥ २१८॥

मातस्समष्टिचिद्रूपे विभूतिर्भुवनं तव ।
इह व्यष्टि शरीरेषु भान्ती तदनुपश्यसि ।। २१९।।

त्वं बह्म त्वं पराशक्तिस्त्वं सर्वा अपि देवताः ।
त्वं जीवास्त्वं जगत्सर्वं त्वदन्यन्नास्ति किञ्चन ।। २२०।।

सती चिदम्ब नैव त्वं भावाभावविलक्षणा ।
शक्तिशक्तिमतोर्भेददर्शनादेष विभ्रमः ।। २२१।।

तवाम्ब जगतश्चास्य मृत्तिकाघटयोरेव ।
सम्बन्धो वेदितव्यः स्यान्न रज्जुफणिनोरिव ।। २२२।।

त्वं शक्तिरस्यविच्छिन्ना भावैरात्मविभूतिभिः ।
अन्तरास्तु महेन्द्रस्य शक्तस्य प्रतिबिम्बवत् ।। २२३।।

शक्तिर्गणपतेः काये प्रवहन्ती सनातनी ।
भारतस्य क्रियादस्य बाध्यमानस्य रक्षणम् ।। २२४।।

इमानि तत्त्ववादीनि वासिष्ठस्य महामुनेः ।
पथ्यावक्त्राणि सेवन्तामनन्तामभवां चितिम् ।। २२५।।

## द्वितीयो माणवकपादः

शक्ततमा शक्रवधू हासविभा मे हरतु ।
मानसमार्गावरकं जेतुमशक्यं तिमिरम् ।। २२६।।

भारतभूपद्मदृशो दुर्दशया क्षीणतनोः ।
बाष्पमजस्रं विगलद्वासवभामा हरतु ।। २२७।।

दण्डितरक्षोजनता पण्डितगीतावनिता ।
मण्डितमाहेन्द्रगृहा खण्डितपापा जयति ।। २२८।।

सद्गुणसम्पत्कलितं सर्वशरीरे ललितम् ।
देवपतेः पुण्यफलं पुष्यतु मे बुद्धिबलम् ।। २२९।।

हासविशेषैरलसैर्दिक्षु किरन्त्यच्छसुधाम् ।
इन्द्रदृगानन्दकरी चन्द्रमुखी मामवतु ।। २३०।।

प्रेमतरङ्गप्रतिमैः शीतलदृष्टिप्रकरैः ।
शक्रमनोमोहकरी वक्रकचा मामवतु ।। २३१।।

गाढरसैश्चारुपदैर्गूढतरार्थैर्वचनैः ।
कामकरी वृत्रजितो हेमतनुर्मामवतु ।। २३२।।

मृत्युतनुः कालतनोर्विश्वपतेः पार्श्वचरी ।
प्रेतजगद्रक्षति या सा तरुणी मामवतु ।। २३३।।

प्रेतजगत्केचिदधो लोकमपुण्यं ब्रुवते ।
शीतरुचेर्देवि परो नेतरदेतद् वदति ।। २३४।।

भूरियमुर्वी वसुधा वारिजवैर्येषभुवः ।
स्वर्महसां राशिरसौ येषु नरप्रेतसुराः ।। २३५।।

राजतशैलं शशिनः केचिदभिन्नं ब्रुवते ।
मृत्युयमावेव शिवावीश्वरि तेषां तु मते ।। २३६।।

राजतशैलः पितृभूरोषधिराडेष यदि ।
काञ्चनशैलः सुरभूर्बन्धुरसौ वारिरुहाम् ।। २३७।।

पावय भूमिं दधतः पावककायस्य विभोः ।
भामिनि भावानुगुणे सेवकमग्ग्रायि तव ।। २३८।।

यस्य यमो भूतपतिर्बुद्धिमतस्तस्य मते ।
आग्निरुपेन्द्रो मघवा काञ्चनगर्भो भगवान् ।। २३९।।

यस्य महाकालवधूर्मृत्युरपि द्वे न विदः ।
त्वं शचि मेधाऽस्यमते पावकशक्तिः कमला ।। २४०।।

नामसु भेदोऽस्तु धियामीश्वरि निष्कृष्टमिदम् ।
सूर्यधरेन्दुष्वजरे त्वं त्रितनुर्भासि परे ।। २४१।।

सात्त्विकशक्तिः सवितर्यादिमरामे भवसि ।
राजसशक्तिर्भुवि नस्तामसशक्तिः शशिनि ।। २४२।।

सर्वगुणा सर्वविभा सर्वबला सर्वरसा ।
सर्वमिदं व्याप्य जगत्कापि विभान्ती परमा ।। २४३।।

व्योमतनुर्निर्वपुषो देवि सतस्त्वं दयिता ।
अस्यभियुक्तैर्विबुधैरम्ब महेश्वर्युदिता ।। २४४।।

सा खलु माया परमा कारणमीशं वदताम् ।
सा प्रकृतिः साङ्ख्यविदां सा यमिनां कुण्डलिनी ।। २४५।।

सा ललिता पञ्चदशीमुत्तमविद्यां जपताम् ।
सा खलु चण्डी जननी साधुनवार्णं भजताम् ।। २४६।।

सा मम शच्याः परमं कारणरूपं भवति ।
कार्यतनुर्दिवि शक्रं सम्मदयन्ती लसति ।। २४७।।

व्योमतनोः सर्वजगच्चालनसूत्रं तु वशे ।
निर्वहणे तस्य पुनर्दिव्यतनुस्त्रीत्रितयम् ।। २४८।।

पातुमिमं स्वं विषयं हन्त चिरान्निर्विजयम् ।
किङ्करमीशे विभयं मां कुरु पर्याप्तशयम् ।। २४९।।

चारुपदक्रीडनकैर्मातरिमैर्माणवकैः ।
चेतसि ते देवनुते प्रीतिरमोघा भवतु ।। २५०।।

## तृतीयश्चित्रपदापादः

अप्यलसो हरिदन्तध्वान्तततेरपि हर्ता ।
अस्तु ममेन्द्रपुरन्ध्री हासलवः शुभकर्ता ।। २५१।।

पाहि परैर्हृतसारां नेत्रगलज्जलधाराम् ।
भारतभूमिमनाथां देवि विधाय सनाथाम् ।। २५२।।

चालयता सुरराजं पालयता भुवनानि ।
शीलयता नतरक्षां कालयता वृजिनानि ।। २५३।।

लालयता मुनिसङ्घं कीलयता दिवि भद्रम् ।
पावय मां सकृदीशे भासुरदृक्प्रसरेण ।। २५४।।

सर्वरुचामपि शालां त्वां शचि मङ्गललीलाम् ।
कालकचामुत कालीं पद्ममुखीमुत पद्माम् ।। २५५।।

यः स्मरति प्रतिकल्यं भक्तिभरेण परेण ।
तस्य सुरेश्वरि साधोरस्मि पदाब्जभुजिष्यः ।। २५६।।

यस्तव नामपवित्रं कीर्तयते सुकृती ना ।
वासवसुन्दरि दासस्तच्चरणस्य सदाऽहम् ।। २५७।।

पावकसागरकोणं यस्तव पावनयन्त्रम् ।
पूजयति प्रतिघस्रं देवि भजामि तदङ्ध्रिम् ।। २५८।।

यस्तव मन्त्रमुदारप्राभवमागमसारम् ।
पावनि कूर्चमुपास्ते तस्य नमश्चरणाय ।। २५९।।

शान्तधियेतरचिन्तासन्ततिमम्ब विधूय ।
चिन्तयतां तव पादावस्मि सतामनुयायी ।। २६०।।

शोधयतां निजतत्त्वं साधयतां महिमानम् ।
भावयतां चरणं ते देवि पदानुचरोऽहम् ।। २६१।।

योऽनुभवेन्निजदेहे त्वामजरे प्रवहन्तीम् ।
सन्ततचिन्तनयोगात्तस्य नमामि पदाब्जम् ।। २६२।।

बोधयते भवतीं यः प्राणगतागतदर्शी ।
कुण्डलिनीं कुलकुण्डात्तं त्रिदिवेश्वरि वन्दे ।। २६३।।

लोचनमण्डलसौधां लोकनमूलविचारी ।
विन्दति यः परमे त्वां वन्दनमस्य करोमि ।। २६४।।

मानिनि जम्भजितस्त्वां मानसमूलवितर्की ।
वेदहृदम्बुरुहे यः पादममुष्य नमामि ।। २६५।।

अन्तरनादविमर्शी पश्यति यः सुकृती ते ।
वैभवमम्ब विशुद्धे तेन वयं परवन्तः ।। २६६।।

इन्द्रपदस्थितचित्तश्शीर्षसुधारसमत्तः ।
यो भजते जननि त्वां तच्चरणं प्रणमामि ।। २६७।।

रासनवारिणि लग्नः सम्मदवीचिषु मग्नः ।
ध्यायति यः परमे त्वां तस्य पदं मम वन्द्यम् ।। २६८।।

त्वां सदहञ्ङकृतिरूपां योगिनुते हतपापाम् ।
धारयते हृदये यस्तस्य सदाऽस्मि विधेयः ।। २६९।।

धूतसमस्तविकल्पो यस्तव पावनलीलाम् ।
शोधयति स्वगुहायां तस्य भवाम्यनुजीवी ।। २७०।।

यो भजते निजदृष्टिं रूपपरिग्रहणेषु ।
कामपि देवि कलां ते तस्य पदे निपतेयम् ।। २७१।।

कर्मणि कर्मणि चेष्टामम्ब तवैव विभूतिम् ।
यः शितबुद्धिरुपास्ते तत्पदमेष उपास्ते ।। २७२।।

वस्तुनि वस्तुनि सत्तां यो भवतीं समुपास्ते ।
मातरमुष्य वहेयं पादयुगं शिरसाऽहम् ।। २७३।।

पातुमिमं निजदेशं सर्वदिशासु सपाशम् ।
अम्ब विधाय समर्थं मां कुरु देवि कृतार्थम् ।। २७४।।

चित्रपदाभिरिमाभिश्चित्रविचित्रचरित्रा ।
सम्मदमेतु मघोनः प्राणसखी मृगनेत्रा ।। २७५।।

## चतुर्थो नाराचिकापादः

अन्तर्विधुन्वता तमः प्राणस्य तन्वता बलम् ।
मन्दस्मितेन देवताराज्ञी करोतु मे शिवम् ॥ २७६॥

उत्थाप्य पुण्यसञ्चयं सम्मर्द्य पापसंहतिम् ।
सा भारतस्य सम्पदे भूयाद्बलारिभामिनी ॥ २७७॥

लीलासखी बिडौजसस्स्वर्वाटिकासु खेलने ।
पीयुषभानुजिन्मुखी देवी शची विराजते ॥ २७८॥

पक्षः परो मरुत्वतो रक्षः प्रवीरमर्दने ।
भामालि भासुरानना देवी शची विराजते ॥ २७९॥

भीतिं निशाटसंहतेः प्रीतिं सुपर्वणां ततेः ।
ज्याटङ्कृतैर्वितन्वती देवी शची विराजते ॥ २८०॥

देवेन्द्रशक्तिधारिणी शत्रुप्रसक्तिवारिणी ।
मौनीन्द्रमुक्तिकारिणी देवी शची गतिर्मम ॥ २८१॥

सन्नस्वदेशदर्शनाद्भिन्नस्वजातिवीक्षणात् ।
खिन्नस्य संश्रितावनी देवी शची गतिर्मम ॥ २८२॥

सङ्घे सहस्रधाकृते देशे निकृष्टतां गते ।
शोकाकुलस्य लोकभृद्देवी शची गतिर्मम ॥ २८३॥

सा संविदोऽधिदेवता तस्यास्स्वरः परो वशे ।
सर्वं विधीयते तया तस्मात्परा मता शची ॥ २८४॥

सा याति सूक्ष्ममप्यलं सा भाति सर्ववस्तुषु ।
सा माति खं च निस्तुलं तस्मात्परा मता शची ।। २८५।।

सा सर्वलोकनायिका सा सर्वगोलपालिका ।
सा सर्वदेहचालिका तस्मात्परा मता शची ।। २८६।।

यस्याः कृतिर्जगत्त्रयं या तद्बिभर्ति लीलया ।
यस्यां प्रयाति तल्लयं सा विश्वनायिका शची ।। २८७।।

धर्मे परिक्षयं गते याऽविश्य निर्मलं जनम् ।
तद्रक्षणाय जायते सा विश्वनायिका शची ।। २८८।।

वेधा ऋतस्य योदिता मन्त्रेण सत्यवादिना ।
बाधानिवारिणी सतां सा विश्वनायिका शची ।। २८९।।

यज्ञो यया विनीयते युद्धं तथा पृथग्विधभ् ।
तां देवराजमोहिनीं नारीं नुमः पुरातनीम् ।। २९०।।

यस्यास्सुतो वृषाकपिर्देवोऽसतां प्रशासिता ।
तां सर्वदा सुवासिनीं नारीं नुमः पुरातनीम् ।। २९१।।

यस्यास्समा नितम्बिनी काचिन्न विष्टपत्रये ।
तां नित्यचारु यौवनां नारीं नुमः पुरातनीम् ।। २९२।।

यच्चारुता न दृश्यते मन्दारपल्लवेष्वपि ।
तत्सुन्दराच्चसुन्दरं शच्याः पदाम्बुजं श्रये ।। २९३।।

यस्य प्रभा न विद्यते माणिक्यतल्लजेष्वपि ।
तद्भासुराच्च भासुरं शच्याः पदाम्बुजं श्रये ।। २९४।।

न स्यादघैस्तिरस्कृतो यच्चिन्तको नरः कृती ।
तत्पावनाच्च पावनं शच्याः पदाम्बुजं श्रये ।। २९५।।

राजन्नखेन्दुभानुभिस्सर्वं तमो विधुन्वते ।
बृन्दारकेन्द्रसुन्दरीपादाम्बुजाय मङ्गलम् ।। २९६।।

गीर्वाणमौलिरत्नभा सङ्क्षालिताय दीप्यते ।
स्वर्गाधिनाथभामिनिपादाम्बुजाय मङ्गलम् ।। २९७।।

बालार्कबिम्बरोचिषे योगीन्द्र हृद्गुहाजुषे ।
पाकारिजीवितेश्वरीपादाम्बुजाय मङ्गलम् ।। २९८।।

आत्मीयदेशरक्षणे शक्तं करोतु सर्वथा ।
पापद्विषां प्रियङ्करी वासिष्ठमिन्द्रसुन्दरी ।। २९९।।

वासिष्ठवाक्प्रदीप्तिभिर्नाराचिकाभिरीश्वरी ।
गीर्वाणचक्रवर्तिनस्सम्मोदमेतु सुन्दरी ।। ३००।।

।। तृतीयमानुष्टुभं शतकं समाप्तम् ।।

# अथ चतुर्थं बार्हतं शतकम्

## प्रथमो हलमुखीपादः

क्षीरवीचिपृषतसितं प्रेमधारिदरहसितम् ।
नाकराजनलिनदृशः शोकहारि मम भवतु ।। ३०१।।

अध्वनो गलितचरणामध्वरक्षितिमविभवाम् ।
आदधातु पथि विमले वैभवे च हरितरुणी ।। ३०२।।

ब्रह्मणश्चितिरथनभः कायभागवगतिमती ।
या तदा पृथगिव बभौ धर्मितां स्वयमपि गता ।। ३०३।।

मोदबोधविभवकृतप्राकृतेतरवरतनु ।
सर्वसद्गुणगणयुतं या ससर्ज सुरमिथुनम् ।। ३०४।।

पुंसि दीप्तवपुषि तयोर्ब्रह्म सोऽहमिति लसति ।
योषिते किल धियमदात्तस्य शक्तिरहमिति या ।। ३०५।।

याभिमानबलवशतस्तामुदारतमविभवाम् ।
मन्यते स्म वरवनितां स्वाधिदैविकतनुरिति ।। ३०६।।

आदिपुंसि गगनतनुर्या तनोति तनुजमतिम् ।
आदधाति युवतितनुः प्राणनायक इति रतिम् ।। ३०७।।

तां परां भुवनजननीं सर्वपापततिशमनीम् ।
तन्त्रजालविनुतबलां स्तौमि सर्वमतिममलाम् ।। ३०८।।

सा मतिर्विदितविषया सा रुचिर्विततविषया ।
सा रतिर्विनुतविषया सा स्थितिर्विधुतविषया ।। ३०९।।

यत्र यत्र मम धिषणा ग्राह्यवस्तुनि गतिमती ।
तत्र तत्र विलसतु सा सर्वगा सकलचरिता ।। ३१०।।

दुर्बलस्य बहुलबलैरर्दितस्य जगति खलैः ।
आदिदेवि तव चरणं पावनं भवति शरणम् ।। ३११।।

पौरुषे भवति विफले त्वामयं जननि भजते ।
किं नुते यदि विमुखता पौरुषं कथय भजताम् ।। ३१२।।

कर्तुरप्रतिहतगिरः पौरुषाच्छतगुणमिदम् ।
ध्यातुरस्खलितमनसः कार्यसिद्धिषु तव पदम् ।। ३१३।।

पौरुषं विदितमफलं काङ्क्षिते मम सुरनुते ।
शक्तमीदृशि तु समये श्रद्दधामि तव चरणम् ।। ३१४।।

पौरुषं यदि कविमतं देवि तेऽपि पदभजनम् ।
दैववादपटुवचसो मूकतैव मम शरणम् ।। ३१५।।

पूर्वजन्मसुकृतफलं दैवमम्ब निगदति यः ।
भक्तिपौरुषविरहिणो भावितस्य रिपुदयितम् ।। ३१६।।

उद्यतस्य तव चरणं संश्रितस्य च सुरनुते ।
पूर्वजन्मसुकृतबलश्रद्धयाऽलमहृदयया ।। ३१७।।

अस्तु पूर्वभवसुकृतं मास्तु वा जननि जगताम् ।
साम्प्रतं तव पदयुगं संश्रितोस्म्यव विसृज वा ।। ३१८।।

नास्ति सम्प्रति किमपि किं भूतिमाप्स्यसि किमु ततः ।
अन्यजन्मनि वितरणे का प्रसक्तिरमरनुते ।। ३१९।।

नान्यजन्मनि बहुशिवं नापि नाकभुवनसुखम् ।
कामये फलमभिमतं देहि सम्प्रति शचि न वा ।। ३२०।।

मेदिनी भुवनतलतो निस्तुलादुत गगनतः ।
भास्करादुत रुचिनिधेः काम्यमीश्वरि वितर मे ।। ३२१।।

विष्टपे क्वचन वरदे दातुमीश्वरि कृतमतिम् ।
वारयेज्जननि न परस्त्वां जनस्तव पतिमिव ।। ३२२।।

देहि वा भगवति न वा पाहि वा शशिमुखि न वा ।
पावनं तव पदयुगं न त्यजानि हरिदयिते ।। ३२३।।

रक्षितुं भरतविषयं शक्तमिन्द्रहृदयसखी ।
चन्द्रबिम्बरुचिरमुखी सा क्रियाद्भुवि गणपतिम् ।। ३२४।।

सम्प्रहृष्यतु हलमुखीर्भास्वतीर्गणपतिमुनेः ।
सा निशम्य सुरनृपतेर्मोहिनी सदयहृदया ।। ३२५।।

## द्वितीयो भुजगशिशुभृतापादः

मरुदधिपमनोनाथा मधुकरचिकुरास्माकम् ।
वृजिनविधुतिमाधत्तां विशदहसितलेशेन ।। ३२६।।

अखिलनिगमसिद्धान्तो बहुमुनिवरबुद्धान्तः ।
सुरपरिबृढशुद्धान्तो भरतवसुमतीमव्यात् ।। ३२७।।

भगवति भवतीचेतो रतिकृदभवदिन्द्रस्य ।
स तव जननि सन्तानद्रुमवनमतिरम्यं वाम् ॥ ३२८॥

पतिरखिलयुवश्रेष्ठः किमपि युवतिरत्नं त्वम् ।
वनविहृतिषु वां चेतो हरणमभवदन्योन्यम् ॥ ३२९॥

मधुरललितगम्भीरैस्तव हृदयमुपन्यासैः ।
वनविहरणलीलायामहरदयि दिवो राजा ॥ ३३०॥

कलवचनविलासेन प्रगुणमुखविकासेन ।
भुवनमपिमनोऽहार्षीर्जननि वनविहारे त्वम् ॥ ३३१॥

कनककमलकान्तास्या धवलकिरणवक्त्रेण ।
असितजलजपत्राक्षी सितनलिनदलाक्षेण ॥ ३३२॥

अलिचयनिजधम्मिल्ला नवजलधरकेशेन ।
मृदुलतमभुजावल्ली दृढतमभुजदण्डेन ॥ ३३३॥

अमृतनिलयबिम्बोष्ठी रुचिरधवलदन्तेन ।
अतिमुकुरलसद्गण्डा विकचजलजहस्तेन ॥ ३३४॥

युवतिरतितरां रम्या सुललितवपुषा यूना ।
भगवति शचि युक्ता त्वं त्रिभुवनविभुनेन्द्रेण ॥ ३३५॥

विकचकुसुममन्दारद्रुमवनवरवाटीषु ।
विहरणमयि कुर्वाणा मनसिजमनुगृह्णासि ॥ ३३६॥

तव शचि चिकुरे राजत्कुसुमममरवृक्षस्य ।
नव सलिलभृतो मध्ये स्फुरदिव नवनक्षत्रम् ॥ ३३७॥

अभजततरुरौदार्यं विभवमपि महान्तं सः ।
विकचकुसुमसम्पत्त्या भगवति भजते यस्त्वाम् ।। ३३८ ।।

अमरनृपतिना साकं कुसुमितवनवाटीषु ।
भगवति तव विश्रान्तेः स जयति समयः कोऽपि ।। ३३९ ।।

अमरतरुवरच्छायास्वयि मुहुरुपविश्य त्वम् ।
शचि कृतिजनरक्षायै मनसि वितनुषु चर्चाम् ।। ३४० ।।

किमु वसु वितराण्यस्मै सुमतिमुत ददान्यस्मै ।
क्षमतममथवाऽमुष्मिन् बलमुरुघटयानीति ।। ३४१ ।।

हरितरुणि कदा वामे विनमदवनचर्चासु ।
स्मरणसमय आयास्यत्यमलहृदयरङ्गे ते ।। ३४२ ।।

शचि भगवति साक्षात्ते चरणकमलदासोऽहम् ।
इह तु वसुमतीलोके स्मर मम विषयं पूर्वम् ।। ३४३ ।।

न यदि तव मनो दातुं स्वयमयि लघवे मह्यम् ।
उपवनतरुकर्णे वा वद मदभिमतं कर्तुम् ।। ३४४ ।।

निजविषयमतिश्रेष्ठं विपदि निपतितं त्रातुम् ।
स्वकुलमपि सदध्वानं गमयितुमपथे श्रान्तम् ।। ३४५ ।।

अखिलभुवनसम्राजः प्रियतरुणि भवत्यैव ।
मतिबलपरिपूर्णोऽयं गणपतिमुनिराधेयः ।। ३४६ ।।

न किमु भवति शं देशे गतवति कलुषे काले ।
तव भजनमघं सद्यो हरिहयललने जेतुम् ।। ३४७ ।।

त्रिजगति सकलं यस्य प्रभवति पृथुले हस्ते ।
स बहुलमहिमा कालो मम जननि विभूतिस्ते ।। ३४८।।

अनवरतगलद्बाष्पां भरतवसुमतीं त्रातुम् ।
वितरतु दयिताजिष्णोर्गणपतिमुनये शक्तिम् ।। ३४९।।

भुजगशिशुभृता एताः कविगणपतिना गीताः ।
विदधतु मुदितां देवीं विबुधपतिमनोनाथाम् ।। ३५०।।

## तृतीयो मणिमध्यापादः

मङ्गलधायी पुण्यवतां मन्मथधायी देवपतेः ।
विष्टपराज्ञीहासलवो विक्रमधायी मे भवतु ।। ३५१।।

दृष्टिविशेषैश्शीततरैर्भूर्यनुकम्पैः पुण्यतमैः ।
भारतभूमेस्तापततिं वासवकान्ता सा हरतु ।। ३५२।।

पावनदृष्टिर्योगिहिता भासुरदृष्टिर्देवहिता ।
शीतलदृष्टिर्भक्तहिता मोहनदृष्टिश्शक्रहिता ।। ३५३।।

उज्ज्वलवाणी विक्रमदा वत्सलवाणी सान्त्वनदा ।
मञ्जुलवाणी सम्मददा पन्नगवेणी सा जयति ।। ३५४।।

शारदराकाचन्द्रमुखी तोयदमालाकारकचा ।
मेचकपाथोजातदलश्रीहरचक्षुर्वासिकृपा ।। ३५५।।

चम्पकनासागण्डविभामण्डलखेलत्कुण्डलभा ।
उक्तिषु वीणाबिम्बफलश्रीहरदन्तप्रावरणा ।। ३५६।।

निर्मलहासक्षालितदिग्भित्तिसमूहा मोहहरी ।
काञ्चनमालाशोभिगला सन्ततलीला बुद्धिकला ।। ३५७।।

विष्टपधारि क्षीरधरस्वर्णघटश्रीहारिकुचा ।
कापि बिडौजो राज्यरमा चेतसि माता भातु मम ।। ३५८।।

दिव्यसुधोर्मिर्भक्तिमतां पावककीला पापकृताम् ।
व्योम्नि चरन्ती शक्रसखी शक्तिरमोघा मामवतु ।। ३५९।।

सम्मदयन्ती सर्वतनुं संशमयन्ती पापततिम् ।
सम्प्रथयन्ती सर्वमतीस्सङ्घटयन्ती प्राणबलम् ।। ३६०।।

निर्जितशोकाधूततमास्संस्कृतचित्ता शुद्धतमा ।
वासवशक्तेर्व्योमजुषः काचन वीचिर्मां विशतु ।। ३६१।।

उद्गतकीलं मूलमिदं भिन्नकपालं शीर्षमिदम् ।
उज्झित मोहं चित्तमिदं वासवशक्तिर्मां विशतु ।। ३६२।।

दृश्यविरक्तं चक्षुरिदं भोगविरक्तं कायमिदम् ।
ध्येयविरक्ता बुद्धिरियं वासवशक्तिर्मां विशतु ।। ३६३।।

चक्षुरदृश्यज्वालभृता व्यापकखेन प्रोल्लसता ।
विस्मृतकायं सन्दधती वासवशक्तिर्मां विशतु ।। ३६४।।

कायमजस्रं वज्रदृढं बुद्धिमशेषे व्याप्तिमतीम् ।
दिव्यतरङ्गैरादधती वासवशक्तिर्मां विशतु ।। ३६५।।

मूर्ध्नि पतन्ती व्योमतलात्सन्ततमन्तः सर्वतनौ ।
सम्प्रवहन्ती दिव्यझरैर्वासवशक्तिर्मां विशतु ।। ३६६।।

भानुविभायां भासकता दिव्यसुधायां मोदकता ।
काऽपि सुरायां मादकता वासवशक्त्यां तत्त्रितयम् ।। ३६७।।

भासयतान्मे सम्यगृतं मोदमुदारं पुष्यतु मे ।
साधुमदं मे वर्धयतान्निर्जरभर्तुः शक्तिरजा ।। ३६८।।

कश्चन शक्तिं योगबलादात्मशरीरे वर्धयति ।
एषि विवृद्धिं भक्तिमतः कस्यचिदेशे त्वं वपुषि ।। ३६९।।

साधयतां वा योगविदां कीर्तयतां वा भक्तिमताम् ।
वत्सलभावादिन्द्रवधूर्गर्भभुवां वा याति वशम् ।। ३७०।।

यस्य समाधिः कोऽपि भवेदात्ममनीषा तस्य बलम् ।
यस्तव पादाम्भोजरतस्तस्य खलु त्वं देवि बलम् ।। ३७१।।

द्वादशवर्षी योगबलाद्या खलु शक्तिर्युक्तमतेः ।
तां शचि दातुं भक्तिमते कापि घटी ते मातरलम् ।। ३७२।।

योगबलाद्वा ध्यानकृतो भक्तिबलाद्वा कीर्तयतः ।
यातु विवृद्धिं विश्वहिता वासवशक्तिर्मे वपुषि ।। ३७३।।

दुःखितमेतच्छ्रीरहितं भारतखण्डं सर्वहितम् ।
त्रातुमधीशा स्वर्जगतः सुक्षमबुद्धिं मां कुरुताम् ।। ३७४।।

सन्तु कवीनां भर्तुरिमे सुन्दरबन्धाशुद्धतमाः ।
सन्मणिमध्याः स्वर्जगतो राजमहिष्याः कर्णसुखाः ।। ३७५।।

## चतुर्थो मात्रासमकपादः

शुक्लज्योतिः प्रकरैर्व्याप्तः सूक्ष्मोऽप्यन्तान् हरितां हासः ।
जिष्णोः पत्न्यास्तिमिराराति र्निश्शेषं मे हरतान्मोहम् ।। ३७६।।

शृण्वत्कर्णा सदयालोका लोकेन्द्रस्य प्रियनारी सा ।
नित्याक्रोशैर्विरुदद्वाणीं पायादेतां भरतक्षोणीम् ।। ३७७।।

देवेषु स्वः परिदीप्यन्ती भूतेष्विन्दौ परिखेलन्ती ।
शक्तिर्जिष्णोर्द्विपदां सङ्घे हन्तैतस्यां भुवि निद्राति ।। ३७८।।

निद्राणाया अपि ते ज्योतिर्गन्धादेते धरणीलोके ।
मर्त्याः किञ्चित्प्रभवन्तीशे त्वं बुद्धा चेत्किमु वक्तव्यम् ।। ३७९।।

मेघच्छन्नोऽप्यरुणस्तेजो दद्यादेव प्रमदे जिष्णोः ।
अत्रस्थानां भवतीग्रन्थिच्छन्नाप्येवं कुरुते प्रज्ञाम् ।। ३८०।।

ध्यायामो यत्कथयामो यत्पश्यामो यच्छृणुमो यच्च ।
जीवामो वा तदिदं सर्वं निद्राणाया अपि ते भासा ।। ३८१।।

नाडीबन्धादभिमानाच्च च्छन्ना मातर्भवती देहे ।
एकापायादितरो नश्येत्तस्माद्द्वेधा तपसः पन्थाः ।। ३८२।।

चित्तं यस्य स्वजनिस्थाने प्रज्ञा बाह्या न भवेद्यस्य ।
आधत्से त्वं भुवनाधीशे बुद्धा क्रीडां हृदये तस्य ।। ३८३।।

वाणी यस्य स्वजनिस्थाने दूरे कृत्वा मनसा सङ्गम् ।
मातस्तत्र प्रतिबुद्धा त्वं श्लोकैर्लोकं कुरुषे बुद्धम् ।। ३८४।।

हित्वा दृश्यान्यतिसूक्ष्मायां चक्षुर्यस्य स्वमहो वृत्तौ ।
विश्वाऽलिप्ता जगतां मातर्जाग्रत्यस्मिन्नचला भासि ।। ३८५।।

शृण्वन् कर्णौ दयिते जिष्णोरन्तः शब्दं ध्रियते यस्य ।
बुद्ध्वा भूत्वा वियता साधोरेकीभावं कुरुषे तस्य ।। ३८६।।

यातायातं सततं पश्येद्यः प्राणस्य प्रयतो मर्त्यः ।
विश्वस्येष्टां तनुषे क्रीडां तस्मिन् बुद्ध्वा तरुणीन्द्रस्य ।। ३८७।।

स्वान्तं यस्य प्रभवेत्कार्येष्वम्बैतस्मिन्नयि निद्रासि ।
आत्मा यस्य प्रभवेत्कार्येष्वम्बैतस्मिन्नयि जागर्षि ।। ३८८।।

यस्याऽहन्ता भवति स्वान्ते तस्य स्वान्तं प्रभवेत्कर्तुम् ।
यस्याऽहन्ता भवति स्वात्मन्यात्मा तस्य प्रभवेत्कर्तुम् ।। ३८९।।

स्वान्तं यस्य प्रभवेत्कर्तुं तत्कर्माल्पं भवति व्यष्टेः ।
आत्मा यस्य प्रभवेत्कर्तुं तच्छ्लाघ्यं ते बलजित्कान्ते ।। ३९०।।

एतत्स्वान्तं हृदयाज्जातं शीर्षे वासं पृथगाधाय ।
हार्दाहन्तां स्वयमाक्रम्य भ्रान्तानस्मान् कुरुते मातः ।। ३९१।।

अस्माकं भोः कुरुते बाधामस्मज्ज्योतिर्जननि प्राप्य ।
स्वान्ते नैतत्कृतमन्याय्यं कान्ते जिष्णोः शृणु राज्ञि त्वम् ।। ३९२।।

स्वान्ते तेजो हृदयादायाच्चन्द्रे तेजो दिनभर्तुर्वा ।
आश्रान्तं यो मनुते धीरस्तस्य स्वान्तं हृदि लीनं स्यात् ।। ३९३।।

मूलान्वेषिस्फुरदावृत्तं नीचैरायात्कबलीकृत्य ।
जानन्त्येका हृदयस्थाने युञ्जानानां ज्वलसीशाने ।। ३९४।।

शीर्षे चन्द्रो हृदये भानुर्नेत्रे विद्युत्कुलकुण्डेऽग्निः ।
सम्पद्यन्ते महसा.शैस्ते जिष्णोः कान्ते सुतरां शस्ते ।। ३९५।।

मन्वानां त्वां शिरसि स्थाने पश्यन्तीं वा नयनस्थाने ।
चेतन्तीं वा हृदयस्थाने राजन्तीं वा ज्वलनस्थाने ।। ३९६।।

यो ना ध्यायेज्जगतां मातः कश्चिच्छ्रेयानवनौ नाऽतः ।
पूतं वन्द्यं चरणं तस्य श्रेष्ठं वर्ण्यं चरितं तस्य ।। ३९७।।

दोग्ध्रीं मायां रसनां वा यो मन्त्रं मातर्जपति प्राज्ञः ।
सोऽयं पात्रं करुणायास्ते सर्वं काम्यं लभते हस्ते ।। ३९८।।

छिन्नां भिन्नां सुतरां सन्नामन्नाभावादभितः खिन्नाम् ।
एतां पातुं भरतक्षोणीं जाये जिष्णोः कुरु मां शक्तम् ।। ३९९।।

क्लृप्तैः सम्यग्बृहतीछन्दस्येतैर्मात्रासमकैर्वृत्तैः ।
कर्णाध्वानं प्रविशद्भिस्सा पौलोम्यम्बापरितृप्तास्तु ।।४००।।

।। चतुर्थं बार्हतं शतकं समाप्तम् ।।

# अथ पञ्चमं पाङ्कं शतकम्

## प्रथमो मयूरसारिणीपादः

प्रेमवासभूमिरच्छभावस्थानमानमज्जनाघहा मे ।
इन्द्रसुन्दरी मुखाब्जभासी मन्दहास आपदं धुनोतु ।। ४०१।।

वीक्षितैः कृपान्वितैर्हरन्ती पातकानि मङ्गलं भणन्ती ।
जम्भभेदिजीवितेश्वरी मे जन्मदेशमुज्ज्वलं करोतु ।। ४०२।।

अम्बरं च देवतानतभ्रूरम्ब ते तनुद्वयं यदुक्तम् ।
आदिमा तयोर्वृषाकपिं तं देव्यजीजनत्परा जयन्तम् ।। ४०३।।

एतमेव देवि लोकबन्धुं सूरयो वृषाकपिं भणन्ति ।
वर्षहेतुदीधितिर्वृषायं कं पिबन् करैः कपिर्निरुक्तः ।। ४०४।।

केचिदिन्द्रनारि चन्द्ररेखाशेखरं वृषाकपिं गदन्ति ।
पण्डिताः परे तु शेषशय्याशायिनं वृषाकपिं तमाहुः ।। ४०५।।

ब्रह्मणस्पतिं तु वैद्युताग्नेरंशजं मरुद्गणेषु मुख्यम् ।
विश्वराज्ञि विघ्नराजमेके विश्रुतं वृषाकपिं वदन्ति ।। ४०६।।

भास्करश्च शङ्करश्च मातर्माधवश्च मन्त्रनायकश्च ।
आत्मजेषु ते न सन्ति नान्तर्व्यापकान्तरिक्षविग्रहायाः ।। ४०७।।

वासवोऽपि देवि देवतात्मा वल्लभस्तव च्छलाङ्गनायाः ।
आत्मजात एव कीर्तनीयो देवतापथेन देहवत्याः ।। ४०८।।

साशवस्युदीरितासि धौरैर्देहिनी विहायसेन्द्रसूस्त्वम् ।
लिङ्गभेदतोऽनुरूपतस्तत्कीर्तनं शवो हि शक्तिवाचि ।। ४०९।।

नादितिर्विभिद्यते शवस्यास्सर्वदेव मातरं विदुर्याम् ।
सा मरुत्प्रसूरभाणि पृश्निः सापि भिद्यते ततो न देव्याः ।। ४१०।।

शक्तिरेव सा न्यगादि पृश्निश्शक्तिरेव साऽदितिर्न्यभाणि ।
शक्तिरेव साऽभ्यधायि भद्रा शक्तिरेव सा शवस्यवादि ।। ४११।।

विज्जनः प्रकृष्टशक्तिभागं शब्दमेव पृश्निमाह धेनुम् ।
या परैर्बुधैरभाणि गौरी मानवेष्टभाषयैव नारी ।। ४१२।।

व्यापकत्वकल्पितं विशालं देशमेव शक्तिभागमाहुः ।
बुद्धिशालिनोऽदितिं सवित्रीं या परैर्विचक्षणैः स्मृता द्यौः ।। ४१३।।

नित्यमोदरूपशक्तिभागं पण्डिताः प्रकीर्तयन्ति भद्राम् ।
उक्तिभेदचातुरीप्रलुब्धाः सूरयः परे शिवां जुगुर्याम् ।। ४१४।।

वीर्यरूपभाग एव गण्यः पण्डितैः शवस्यभाणि शक्तेः ।
ओजसो न सोऽतिरिच्यत.शो भिद्यते ततो न वज्रमुग्रम् ।। ४१५।।

वज्रमेव भाषया परेषामुच्यते प्रचण्डचण्डिकेति ।
यद्विभूतिलेशचुम्बितात्मा जीयते न केनचित्पृथिव्याम् ।। ४१६।।

सर्वतो गतिश्शचीति शक्तिः कीर्त्यते बुधैरुदारकीर्तिः ।
सर्वभागवाचकं पदं तत् पावनं पुरातनं प्रियं नः ।। ४१७।।

यश्शचीति नामकीर्तयेन्ना पुष्करेण ते शरीरवत्याः ।
दिव्यसुन्दरी तनोरुताहो तं पराभवेन्न देवि पापम् ।। ४१८।।

अम्बरं वरं तवाम्ब कायं यस्सदा विलोकयन्नुपास्ते ।
लोकजालचक्रवर्तिजाये तं पराभवेन्न देवि पापम् ।। ४१९ ।।

पूर्णिमासुधांशुबिम्बवक्त्रं फुल्लवारिजातपत्रनेत्रम् ।
शुभ्रतानिधानमन्दहासं कालमेघकल्पकेशपाशम् ।। ४२० ।।

रत्नदर्पणाभमञ्जुगण्डं चम्पकप्रसूनचारुनासम् ।
कुन्दकुड्मलाभकान्तदन्तं कल्पपल्लवाभदन्तचेलम् ।। ४२१ ।।

सद्वराभयप्रदायिहस्तं सर्वदेववन्द्यपादकञ्जम् ।
दिव्यरत्नभूषणैरनर्घैर्भूषितं कनत्सुवर्णवर्णम् ।। ४२२ ।।

दिव्यशुक्लवस्त्रयुग्मधारि स्वर्गसार्वभोमनेत्रहारि ।
यः स्मरेद्वराङ्गनावपुस्ते तं पराभवेन्न देवि पापम् ।। ४२३ ।।

भारतक्षितेरिदं जनन्याश्शोकजन्यबाष्पवारि हर्तुम् ।
देहि शक्तिमाश्रिताय मह्यं पाहि धर्ममिन्द्रचित्तनाथे ।। ४२४ ।।

सद्वसिष्ठसन्ततेरिमाभिस्सत्कवेर्मयूरसारिणीभिः ।
सम्मदं प्रयातु शक्रचेतस्सम्प्रमोहिनीसरोजनेत्रा ।। ४२५ ।।

## द्वितीयो मनोरमापादः

हसितमाततायिपातकप्रमथनप्रसिद्धविक्रमम् ।
अमरभूमिपालयोषितो मम करोतु भूरिमङ्गलम् ।। ४२६ ।।

करुणया प्रचोदिता क्रियाद्भरतभूमिमक्षयश्रियम् ।
चरणकञ्जराजदिन्दिरा सुरनरेश्वरस्य सुन्दरी ।। ४२७ ।।

न भवनं न वा जगत्पृथङ्निवसनाय ते सुरार्चिते ।
यदखिलानि विष्टपानि ते वपुषि सर्वमन्दिराणि च ।। ४२८ ।।

मतिदविष्ठसीमभासुरं तव शरीरमेव पुष्करम् ।
परमपूरुषस्य वल्लभे भुवनमेकमुच्यते बुधैः ।। ४२९ ।।

तरणयस्सुधांशवस्तथा सह भुवा ग्रहाः सहस्रशः ।
अयि जगन्ति विस्तृतानि ते वपुषि पुष्करे जगत्यजे ।। ४३० ।।

बहुभिरुष्णभानुभिर्हृतात् बहुभिरिन्दुभिर्वशीकृतात् ।
वियति लोकजालधात्रि ते शतगुणं बलं प्रशिष्यते ।। ४३१ ।।

न विभुरेककस्य भास्वतो विभवमेव ना प्रभाषितुम् ।
किमुत ते दधासि योदरे द्युतिमतां शतानि तादृशाम् ।। ४३२ ।।

इह विहायसा शरीरिणीमतिसमीपवासिनीमपि ।
न खलु कोऽपि लोकितुं प्रभुर्भगवतीं परामयुक्तधीः ।। ४३३ ।।

तदिदमुच्यते जनो जगद्वपुरमेयमादिदेवि ते ।
जनयते यतोऽखिलं दृशोर्विषयभूतमेतदाततम् ।। ४३४ ।।

बहुलतारकागणैर्युतं किमपि खं तवेह वर्ष्मणि ।
शचि विभज्य भाषयैकया सुकवयो महोजगद्विदुः ।। ४३५ ।।

इदमिनेन्दुभूविलक्षणैर्दिनकरैस्सुधाकरैर्ग्रहैः ।
बहुजगद्भिरन्वितं महोजगदशेषधात्रि नैककम् ।। ४३६ ।।

अजरमव्ययं सनातनं मुनिजनैकवेद्यवैभवम् ।
न भवतीं विना तपोजगत्पृथगशेषनाथनायिके ।। ४३७ ।।

सकलदृश्यमूलकारणं तव च संश्रयो निराश्रयः ।
जननि सत्यलोक संज्ञया परमपूरुषोऽभिधीयते ।। ४३८ ।।

अयि पुरातनर्षिभाषया गगनमेतदाप ईरिताः ।
अथ यदासुवीर्यमुज्झितं भगवतस्त्वमेव तत्परे ।। ४३९ ।।

शचि विराड्भवत्यभाषत श्रुतिरपीदमेव नाम ते ।
विततविश्वविग्रहात्मनि प्रथितमेतदाह्वयं परम् ।। ४४० ।।

उपनिषद्गिरा विराड्वधूः पुरुष एष भाषयान्यया ।
उभयथापि साधु तत्पदं भवति ते न संशयास्पदम् ।। ४४१ ।।

न वनिता न वा पुमान् भवेज्जगति योऽन्तरश्शरीरिणाम् ।
तनुषु लिङ्गभेददर्शनात् तनुमतश्च लिङ्गमुच्यते ।। ४४२ ।।

अखिलनाथवीर्यधारणाद्गगनभूमिरङ्गनामता ।
सकललोकबीजभृत्त्वतो गगनदेश एष पूरुषः ।। ४४३ ।।

स्फुटविभक्तगात्रलक्ष्मणां नियतवादिनामदर्शनात् ।
न पुरुषो वियद्यथा वयं न वनिता वियद्यथैव नः ।। ४४४ ।।

अभिविमानतोऽथ वा शची विबुधराजयोर्विलक्षणात् ।
वरविलसिनी वियत्तनुस्सदविकारमुत्तमः पुमान् ।। ४४५ ।।

हृदयमल्पमप्यदो जनन्यनवमं विशालपुष्करात् ।
विमलदेहदुर्गमध्यगं सकलराज्ञि सौधमस्तु ते ।। ४४६ ।।

विकसितं निजांशुवीचिभिर्हृदयमालयं विशाम्ब मे ।
विकचमुष्णभानुभानुभिर्दशशतच्छदं यथा रमा ।। ४४७ ।।

हृदयसाधुसौधशायिनीं नयनरम्यहर्म्यचारिणीम् ।
भुवनराजचित्तमोहिनीं नमत तां परां विलासिनीम् ।। ४४८ ।।

तव परे मरीचिवीचयस्तनुगुहां प्रविश्य विश्रुते ।
भरतभूमिरक्षणोद्यतं गणपतिं क्रियासुरुज्ज्वलम् ।। ४४९ ।।

गणपतेर्मनोरमा इमास्सुगुणवेदिनां मनोरमाः ।
अवहिता शृणोतु सादरं सुरमहीपतेर्मनोरमाः ।। ४५० ।।

## तृतीयो मणिरागपादः

ज्योतिषां नृपतिः सकलानां शान्तिमेव सदाभिदधानः ।
निर्मलो हरतात्सुरराज्ञीमन्दहासलवो मम पापम् ।। ४५१ ।।

दुष्टलोकदविष्ठपदाब्जा शिष्टशोकनिवारणदक्षा ।
नाकलोकमहीपतिरामा भारतस्य धुनोत्वसुखानि ।। ४५२ ।।

देवमौलिमणीकिरणेभ्यो विक्रमं स्वयमेव ददाना ।
देवराजवधूपदपद्मश्रीस्तनोतु सदा मम भद्रम् ।। ४५३ ।।

देवि ते वदनं बहुकान्तं साक्षि तत्र पुरन्दरचेतः ।
अम्ब ते चरणावतिकान्तावत्र साक्षि मनः स्मरतां नः ।। ४५४ ।।

भासुरं सुरसंहतिवन्द्यं सुन्दरं हरिलोचनहारि ।
पावनं नतपापविदारि स्वर्गराज्ञि पदं तव सेवे ।। ४५५ ।।

जङ्घिके जयतस्तव मातः सङ्घ एव रुचां यदधीनः ।
वासवस्य दृशां च सहस्रं यद्विलोकनलोभविनम्रम् ।। ४५६ ।।

सक्थिनी तव वासवकान्ते रामणीयकसारनिशान्ते ।
वन्दते विनयेन ममेयं वन्दिनस्तव पावनि वाणी ।। ४५७ ।।

इन्द्रनारि कटिस्तव पृथ्वीमण्डलस्यतुला महनीये ।
मध्यमो नभसः प्रतिमानं भोगिनां भुवनस्य च नाभिः ।। ४५८ ।।

धीरतां कुरुते विगतासुं सा सुपर्वपतेर्निशिताग्रा ।
सा तवाम्ब मनोभवशस्त्री रोमराजिरघं मम हन्तु ।। ४५९ ।।

रोमराजिभुजङ्गशिशुस्ते देवि देवपतेर्हृदयस्य ।
दंशनेन करोत्ययि मोहं जीविताय चिराय विचित्रम् ।। ४६० ।।

पूर्णहेमघटविव शक्रावाहितां दधतावयि शक्तिम् ।
विश्वपोषणकर्मणि दक्षावम्ब दुग्धधरौ जयतस्ते ।। ४६१ ।।

लोकमातरुरोरुहपूर्णस्वर्णकुम्भगता तव शक्तिः ।
लोकपालनकर्मणि वीर्यं देवि वज्रधरस्य बिभर्ति ।। ४६२ ।।

अक्षयामृतपूर्णघटौ ते शक्रपत्नि कुचौ तव पीत्वा ।
लोकबाधकभीकररक्षो धूनने प्रबभूव जयन्तः ।। ४६३ ।।

हस्तयोस्तव मार्दवमिन्द्रो भाषतां सुषमामपि देवः ।
दातृतामनयोर्मुनिवर्गो वर्णयत्यजरे पटुतां च ।। ४६४ ।।

पुष्पमाल्यमृदोरपि बाहोः शक्तिरुग्रतमाशरनाशे ।
दृश्यते जगतामधिपे ते भाषतां तव कस्तनुतत्त्वम् ।। ४६५ ।।

कम्बुकण्ठि तवेश्वरि कण्ठस्तारहारवितानविराजी ।
देवराड्भुजलोचनपथ्यो देवि मे भणताद्बहुभद्रम् ।। ४६६ ।।

आननस्य गभस्तिनिधेस्ते रामणीयकमद्भुतमीष्टे ।
अप्यमर्त्यनुताखिलसिद्धेर्वासवस्य वशीकरणाय ॥ ४६७॥

न प्रसन्नमलं रविबिम्बिं चन्द्रबिम्बमतीव न भाति ।
सुप्रसन्नमहोज्ज्वलमास्यं केन पावनि ते तुलयामः ॥ ४६८॥

लोचने तव लोकसवित्रि ज्योतिषः शवसश्च निधाने ।
वक्तुमब्जसमे ननु लज्जे धोरणीमनुसृत्य कवीनाम् ॥ ४६९॥

आयतोज्ज्वलपक्ष्मलनेत्रा चम्पकप्रसवोपमनासा ।
रत्नदर्पणरम्यकपोला श्रीलिपिद्युतिसुन्दरकर्णा ॥ ४७०॥

अष्टमीशशिभासुरभाला विष्टपत्रयचालकलीला ।
स्मेरचारुमुखी सुरभर्तुः प्रेयसी विदधातु शिवं मे ॥ ४७१॥

मन्दहासलवेषु वलक्षा मेचका चिकुरप्रकरेषु ।
शोणतामधरे दधती सा रक्षतु प्रकृतिस्त्रिगुणा नः ॥ ४७२॥

सर्वलोकवधूजनमध्ये यां श्रुतिस्सुभगामभिधत्ते ।
या दिवो जगतो रुचिसारस्तां नमामि पुरन्दररामाम् ॥ ४७३॥

स्वर्गभूपतिलोचनभाग्यश्रीश्शरीरवती जलजाक्षी ।
भारतस्य करोतु समर्थं रक्षणे नरसिंहतनूजम् ॥ ४७४॥

लोकमातुरिमे रमणीयाः पाकशासनचित्तरमण्याः ।
अर्पिताः पदयोर्विजयन्तां सत्कवेः कृतयो मणिरागाः ॥ ४७५॥

## चतुर्थो मेघवितानपादः

अमरक्षितिपालकचेतो मदनं सदनं शुचितायाः ।
स्मितमादिवधूवदनोत्त्थं हरतादखिलं कलुषं मे ।।४७६।।

सुतरामधनामतिखिन्नामधुना बहुलं विलपन्तीम् ।
परिपातु जगत्त्रयनेत्री भरतक्षितिमिन्द्रपुरन्ध्री ।।४७७।।

स्थलमेतदमर्त्यनृपालप्रमदे तव मेघवितानम् ।
अयि यत्र परिस्फुरसीशे तटिदुज्ज्वलवेषधरा त्वम् ।।४७८।।

तटिता तव भौतिकतन्वा जितमम्बुधरे विलसन्त्या ।
उपमा भुवि या ललितानां युवचित्तहृतां वनितानाम् ।।४७९।।

स्फुरितं तव लोचनहारि स्तनितं तव धीरगभीरम् ।
रमणीयतया मिलिता ते शचि भीकरता चपलायाः ।।४८०।।

चपले शचि विस्फुरसीन्द्रं घनजालपतिं मदयन्ती ।
दितिजातमवग्रहसंज्ञं जनदुःखकरं दमयन्ती ।।४८१।।

प्रभुमभ्रपतिं रमयन्ती दुरितं नमतां शमयन्ती ।
हरितां तिमिराणि हरन्ती पवमानपथे विलसन्ती ।।४८२।।

अलघुस्तनितं विदधाना बलमुग्रतमं च दधाना ।
हृदयावरकं मम मायापटलं तटिदाशु धुनोतु ।।४८३।।

सुरपार्थिवजीवितनाथे निखिले गगने प्रवहन्त्याः ।
तटितस्तव वीचिषु काचिच्चपला लसतीह पयोदे ।।४८४।।

विबुधप्रणुते धनिकानां भवनेषु भवन्त्ययि दीपाः ।
पटुयन्त्रबलादुदितानां तव देवि लवाः किरणानाम् ।।४८५।।

व्यजनानि च चालयसि त्वं बत सर्वजगन्नृपजाये ।
विबुधोऽभिदधात्वथवा को महतां चरितस्य रहस्यम् ।।४८६।।

इह चालित ईड्यमनीषैरयि यन्त्रविशेषविधिज्ञैः ।
बहुलाद्भुतकार्यकलापस्तटितस्तव मातरधीनः ।।४८७।।

अचरस्तरुगुल्मलतादिः सकलश्च चरो भुवि जन्तुः ।
अनिति प्रमदे सुरभर्तुस्तटितस्तव देवि बलेन ।।४८८।।

मनुते निखिलोऽपि भवत्या मनुजोऽनिति वक्तिश्शृणोति ।
अवलोकयते च भणामः किमु ते जगदम्ब विभूतिम् ।।४८९।।

अतिसूक्ष्मपवित्रसुषुम्नापथतस्तनुषु प्रयतानाम् ।
कुलकुण्डकृशानुशिखा त्वं ज्वलसि त्रिदशालयनाथे ।।४९०।।

इतरो न सुरक्षितिपालात्कुलकुण्डगतो ज्वलनोऽयम् ।
इतरेन्द्रविलासिनि न त्वत्कुलकुण्डकृशानुशिखेयम् ।।४९१।।

कुलकुण्डकृशानुशिखायाः किरणैः शिरसि स्थित एषः ।
द्रवतीन्दुरनारतमेतद्वपुरात्ममयं विदधानः ।।४९२।।

मदकृद्बहुलामृतधारापरिपूतमिदं मम कायम् ।
विदधासि भजन्मनुजाप्ते कुलकुण्डधनंजयदीप्ते ।।४९३।।

शिरसीह सतः सितभानोरमृतेन वपुर्मदमेति ।
हृदि भात इनस्य च भासा मतिमेतु परां शचि चेतः ।।४९४।।

मम योगमदेन न तृप्तिर्निजदेशदशाव्यथितस्य ।
अवगन्तुमुपायममोघं शचि भासय मे हृदि भानुम् ।। ४९५।।

विदितः प्रमदस्य विधातुः शशिनो जनयित्रि विलासः ।
अहमुत्सुक ईश्वरि भानोर्विभवस्य च वेत्तुमियत्ताम् ।। ४९६।।

वरुणस्य दिशि प्रवहन्ती मदमम्ब करोषि महान्तम् ।
दिशि वज्रभृतः प्रवहन्ती कुरु बुद्धिमकुण्ठितसिद्धिम् ।। ४९७।।

अमलामधिरुह्य सुषुम्नां प्रवहस्यधुनाम्ब मदाय ।
अमृतामधिरुह्य च किञ्चित्प्रवहेश्वरि बुद्धिबलाय ।। ४९८।।

भरतक्षितिक्षणकर्मण्यभिधाय मनोज्ञमुपायम् ।
अथ देवि विधाय च शक्तं कुरु मां कृतिनं शचि भक्तम् ।। ४९९।।

नरसिंहसुतेन कवीनां विभुना रचितैः कमनीयैः ।
परितृप्यतु मेघवितानैर्मरुतामधिपस्य पुरन्ध्री ।। ५००।।

।। पञ्चमं पाङ्क्तं शतकं समाप्तम् ।।

# अथ षष्ठं त्रैष्टुभं शतकम्

## प्रथम उपजातिपादः

मन्दोऽपि बोधं विदधन्मुनीनां स्वच्छोऽपि रागं त्रिदशेश्वरस्य ।
अल्पोऽपि धुन्वन्हरितां तमांसि स्मिताङ्कुरो भातु जयन्तमातुः ।। ५०१ ।।

अशेषपापौघनिवारणाय भाग्यस्य पाकाय च देवराज्ञी ।
शोकाकुलां भारतभूमिमेतां लोकस्य माता हृदये करोतु ।। ५०२ ।।

धर्मद्विषामिन्द्रनिरादराणां संहारकर्मण्यतिजागरूकाम् ।
देवीं परां देवपथे ज्वलन्तीं प्रचण्डचण्डीं मनसा स्मरामि ।। ५०३ ।।

व्याप्ता तटिद्वा गगने निगूढा नारी सुरेशानमनोरमा वा ।
शक्तिः सुषुम्नापथचारिणी वा प्रचण्डचण्डीति पदस्य भावः ।। ५०४ ।।

समस्तलोकावनिनायिकायाः सुपर्वमार्गेण शरीरवत्याः ।
मातुर्महा.शं महनीयसारं विज्ञानवन्तस्तटितं भणन्ति ।। ५०५ ।।

निगूढतेजस्तनुरम्बिकेयं प्रचण्डचण्डी परितो लसन्ती ।
अव्यक्तशब्देन शरीरवत्याः काल्याः कवीनां वचनेषु भिन्ना ।। ५०६ ।।

शब्दं विना नैव कदापि तेजस्तेजो विना नैव कदापि शब्दः ।
शक्तिद्वयं सन्ततयुक्तमेतत्कथं स्वरूपेण भवेद्विभक्तम् ।। ५०७ ।।

एकैव शक्तिर्ज्वलति प्रकृष्टा स्वरत्यपि प्राभवतः समन्तात् ।
क्रियाविभेदादिह पण्डितानां शक्तिद्वयोक्तिस्तु समर्थनीया ।। ५०८ ।।

एकक्रियायाश्च फलप्रभेदात्पुनर्विभागः क्रियते बहुज्ञैः ।
कालीं च तारां स्वरमग्र्यमाहुः प्रचण्डचण्डीं ललितां च तेजः ॥ ५०९॥

सम्पद्यते शब्दगतेर्हि कालः शब्दो वरेण्यस्तदभाणि काली ।
ध्यातेन शब्देन भवं तरेद्यद्बुधास्ततः शब्दमुशन्ति ताराम् ॥ ५१०॥

यदक्षरं वेदविदामृषीणां वेदान्तिनां यः प्रणवो मुनीनाम् ।
गौरी पुराणेषु विपश्चितां या सा तान्त्रिकाणां वचनेन तारा ॥ ५११॥

सम्पद्यते संहृतिरोजसा यत्प्रचण्डचण्डी तदुदीरितौजः ।
सिध्येदशेषोऽनुभवो यदोजस्यतो बुधास्तां ललितां वदन्ति ॥ ५१२॥

प्रचण्डचण्डीं लघुना पदेन चण्डीं विदुः केचन बुद्धिमन्तः ।
एके विदः श्रेष्ठमहोमयीं तां लक्ष्मीं महत्पूर्वपदां वदन्ति ॥ ५१३॥

अतीव सौम्यं ललितेति शब्दं प्रचण्डचण्डीति पदं च भीमम् ।
देवी दधाना सुतरां मनोज्ञा घोरा च नित्यं हृदि मे विभातु ॥ ५१४॥

प्रचण्डचण्डीं तु शरीरभाजां तनूषु योगेन विभिन्नशीर्षाम् ।
शक्तिं सुषुम्नासरणौ चरन्तीं तां छिन्नमस्तां मुनयो वदन्ति ॥ ५१५॥

कपालभेदो यदि योगवीर्यात्सम्पद्यते जीवत एव साधोः ।
तमेव सन्तः प्रवदन्ति शीर्षच्छेदं शरीरान्तरभासि शक्तेः ॥ ५१६॥

उदीर्यसे निर्जरराजपत्नि त्वं छिन्नमस्ता यमिनां तनूषु ।
उज्जृम्भणे विश्वसवित्रि यस्याः कायं भवेद्वैद्युतयन्त्रतुल्यम् ॥ ५१७॥

पितुर्नियोगात्तनयेन कृत्ते मस्ते जनन्याः किल रेणुकायाः ।
त्वमाविशः पावनि तत्कबन्धं तद्वा त्वमुक्तासि निकृत्तमस्ता ॥ ५१८॥

छिन्नं शिरः कीर्णकचं दधानां करेण कण्ठोद्गतरक्तधाराम् ।
रामाम्बिकां दुर्जनकालरात्रिं देवीं पवित्रां मनसा स्मरामि ।।५१९।।

ध्रुवो रमा चन्द्रधरस्य रामा वाग्वज्रवैरोचसदीर्घनिर्ये ।
कूर्चद्वयं शस्त्रकृशानुजाये विद्यानृपार्णा सुरराजशक्तेः ।।५२०।।

मायाद्विवारं यदि सैकवर्णा विद्यैकवर्णा यदि धेनुरेका ।
धेन्वादि सम्बोधनमस्त्रमग्नेर्विलासिनी चेति धरेन्दुवर्णा ।।५२१।।

चतुष्टयेत्रान्यतमं गृहीत्वा मन्त्रं महेन्द्रस्य मनोधिनाथाम् ।
भजेत यस्तान्त्रिकदिव्यभावमाश्रित्य सिद्धीः सकलाः स विन्देत् ।।५२२।।

संहोत्रमित्यद्भुतशक्तियुक्तं वृषाकपेर्दर्शनमम्ब मन्त्रम् ।
यो वैदिकं ते मनुजो भजेत किञ्चिन्न तस्येह जगत्यसाध्यम् ।।५२३।।

प्रचण्डचण्डि प्रमदे पुराणि पुराणवीरस्य मनोधिनाथे ।
प्रयच्छ पातुं पटुतां परां मे पुण्यामिमामार्यनिवासभूमिम् ।।५२४।।

प्रपञ्चराज्ञीं प्रथितप्रभावां प्रचण्डचण्डीं परिकीर्तयन्त्यः ।
एताः प्रमोदाय भवन्तु शक्तेरुपासकानामुपजातयो नः ।।५२५।।

## द्वितीयो रथोद्धतापादः

क्षालनाय हरितां विभूतये विष्टपस्य मदनाय वज्रिणः ।
तज्जयन्तजननीमुखाब्जतो निर्गतं स्मितमघं धुनोतु नः ।।५२६।।

अन्नलोपकृशभीरुकप्रजां भिन्नभावबलहीननेतृकाम् ।
वासवस्य वरवर्णिनी पैरर्दितामवतु भारतावनिम् ।।५२७।।

पाणिपादमनिमेषराज्ञि ते पारिजातनवपल्लवोपमम् ।
अक्षपाविरहमङ्गभासरिद्वासिचक्रमिथुनं कुचद्वयम् ।।५२८।।

पूर्णचन्द्रयशसोऽपहारकं सम्प्रसादसुषमास्पदं मुखम् ।
ज्ञानशक्तिरुचिशेवधीदृशौ रक्तवर्णकसुधाघनोऽधरः ।।५२९।।

मर्दयत्तिमिरमुद्धतं दिशां अल्पमप्यधिकवैभवं स्मितम् ।
प्रावृडन्तयमुनातरङ्गवन्नीलचारुरतिपावनः कचः ।।५३०।।

वल्लकीं च परुषध्वनिं वदन् दुःखितस्य च मुदावहः स्वरः ।
चारु हावशबलाऽलसा गतिः कायधामवचसां न पद्धतौ ।।५३१।।

योगसिद्धिमतुलां गता मतिश्चातुरी च बुधमण्डलस्तुता ।
विष्टपत्रितयराज्यतोऽप्यसि त्वं सुखाय महते बिडौजसः ।।५३२।।

त्वामुदीक्ष्य धृतदेवतातनुं दीप्तपक्ष्मलविशाललोचनाम् ।
आदितो जननि जन्मिनामभूद् वासवस्य रतिरादिमे रसे ।।५३३।।

आदिमं रसमनादिवासना वासितौ प्रथममन्वगृह्णताम् ।
सम्मदस्य निधिमादिदम्पती सोऽचलत्त्रिभुवने ततः क्रमः ।।५३४।।

ज्यायसा दिविषदां पुरातनी नीलकञ्जनयना विलासिनी ।
यद्विहारमतनोत्प्ररोचनं तत्सतामभवदादिमे रसे ।।५३५।।

न त्वदम्ब नलिनाननाऽधिका नापि नाकपतितोऽधिकः पुमान् ।
नाधिकं च वनमस्ति नन्दनान्नादिमादपि रसोऽधिको रसात् ।।५३६।।

नायिका त्वमसमानचारुता नायकः स मरुतां महीपतिः ।
नन्दनं च रसरङ्गभूः कथं मन्मथस्य न भवेदिहोत्सवः ।।५३७।।

देवि वां मृतिकथैव दूरतो जातुचिद्गलति नैव यौवनम् ।
काङ्क्षितः परिकरो न दुर्लभः किं रसः परिणमेदिहान्यथा ॥५३८॥

विष्टपस्य युवराजकेशवे त्राणभारमखिलं निधाय वाम् ।
क्रीडतोरमरराज्ञि नन्दने क्रीडितानि मम सन्तु भूतये ॥५३९॥

यद्युवाममरराज्ञि नन्दने कुर्वतो रहसि देवि मन्त्रणम् ।
तत्र चेन्मम कृतिर्मनागियं स्पर्शमेति भुवि को नु मत्कृती ॥५४०॥

क्रन्दनं यदि ममेह वन्दिनो नन्दने विहरतोः सवित्रि वाम् ।
अन्तरायकृदथाब्जकान्ति ते सम्प्रगृह्य चरणं क्षमापये ॥५४१॥

योषितामपि विमोहनाकृतिर्मोहनं तु पुरुषसंहतेरपि ।
इन्द्रमम्बरमयां बभूविथ त्वं रसार्द्रहृदया लसद्रसम् ॥५४२॥

दिव्यचन्दनरसानुलेपनैः पारिजातसुमतल्पकल्पनैः ।
चारुगीतकृतिभिश्च भेजिरे नाकलोकवनदेवताश्च वाम् ॥५४३॥

स्वर्णदीसलिलशीकरोक्षिताः पारिजातसुमगन्धधारिणः ।
नन्दने त्रिदशलोकराज्ञि वां केपि भेजुरलसाः समीरणाः ॥५४४॥

आदधासि सकलाङ्गनाधिके पद्मगन्धिनि सुधाधराधरे ।
मञ्जुवाणि सुकुमारि सुन्दरि त्वं सुरेन्द्रसकलेन्द्रियार्चनम् ॥५४५॥

आदिदेवि वदनं तवाभवत् कान्तिधाम मदनं दिवस्पतेः ।
आननादपि रसामृतं किरन्निष्क्रमं विलसितं कलं गिराम् ॥५४६॥

चारुवाग्विलसिताच्च निस्तुलप्रेमवीचिरुचिरं विलोकितम् ।
वीक्षितादपि विलासविश्रमस्थानमल्पमलसं शुचिस्मितम् ॥५४७॥

भासुरेन्द्रदृढबाहुपञ्जरे लज्जया सहजया नमन्मुखी ।
तद्विलोचनविकर्षकालका पातु मां त्रिदिवलोकनायिका ॥५४८॥

भारतक्षितिविषादवारणे तत्सुतं गणपतिं कृतोद्यमम् ।
आदधातु पटुमर्जुनस्मिता दुर्जनप्रमथनक्षमा शची ॥५४९॥

चारुशब्दकलिताः कृतीरिमाः सत्कविक्षितिभुजो रथोद्धताः ।
सा शृणोतु सुरमेदिनीपतेर्नेत्रचित्तमदनी विलासिनी ॥५५०॥

## तृतीयो मौक्तिकमालापादः

निर्मलभासां दिशि दिशि कर्ता पुण्यमतीनां हृदि हृदि धर्ता ।
पालयतान्मामनघविलासः शक्रमहिष्याः सितदरहासः ॥५५१॥

पुण्यचरित्रा मुनिजनगीता वासवकान्ता त्रिभुवनमाता ।
वत्सलभावादवतु विदूनां भारतभूमिं धनबलहीनाम् ॥५५२॥

कोटितटिद्वत्तव तनुकान्तिः पूर्णसमाधेस्तव हृदि शान्तिः ।
वासवभामे भगवति घोरः शत्रुविदारी तव भुजसारः ॥५५३॥

आश्रयभूतं सुमधुरताया आलयभूतं जलधिसुतायाः ।
वासवदृष्टेस्तवमुखमब्जं किङ्करदृष्टेस्तव पदमब्जम् ॥५५४॥

पादसरोजं वृजिनहरं ते यो भजते ना सुरपतिकान्ते ।
तत्र कटाक्षा अयि शतशस्ते तस्य समस्तं भगवति हस्ते ॥५५५॥

ज्ञापकशक्तिः प्रतिनरमस्तं कारकशक्तिः प्रतिनरहस्तम् ।
वासवचक्षुस्सुकृतफलश्रीर्भातु ममान्तः सुरभुवनश्रीः ॥५५६॥

मन्त्रपराणां वचसि वसन्ती ध्यानपराणां मनसि लसन्ती ।
भक्तिपराणां हृदि विहरन्ती भाति परांबा नभसि चरन्ती ।। ५५७।।

सेवकपापप्रशमननामा दिक्तिमिरौघप्रमथनधामा ।
उज्ज्वलशस्त्रा रणभुवि भीमा पातु नतं मां हरिहयरामा ।। ५५८।।

योगिनि शक्तिर्विलससि दान्तिः योषिति शक्तिर्विलससि कान्तिः ।
ज्ञानिनि शक्तिर्विलससि तुष्टिः धन्विनि शक्तिर्विलससि दृष्टिः ।। ५५९।।

सङ्गिनि शक्तिर्विलससि निद्रा ध्यातरि शक्तिर्विलससि मुद्रा ।
वासवकान्ते गगननिशान्ते भाषितुमीशः क्व नु विभवं ते ।। ५६०।।

यद्दितिजानां दमनमवक्रं केशवहस्ते विलसति चक्रम् ।
तत्र कला ते भगवति भद्रा काचन भारं वहति विनिद्रा ।। ५६१।।

दुष्टनिशाटप्रशमनशीलं यत् सितभूभृत्पतिकरशूलम् ।
तत्र महा.शस्तव जगदीशे राजति कश्चित्पटुररिनाशे ।। ५६२।।

यन्निजरोचिर्हृतरिपुसारं वासवहस्ते कुलिशमुदारम् ।
तत्र तवांशो विलसति दिव्यः कश्चन भासो भगवति भव्यः ।। ५६३।।

अम्बरदेशे सुमहति गुप्ता पङ्कजबन्धौ विलसति दीप्ता ।
राजसि मातर्हिमरुचिशीता वेदिकृशानौ क्रतुभृतिपूता ।। ५६४।।

सूक्ष्मरजोभिर्विहितमुदारं यज्जगदेतद्गगनमपारम् ।
तत्तववेदः प्रवदति कायं पावनि भानुस्तव तनुजोऽयम् ।। ५६५।।

ईश्वरि नैकस्तव खरतेजाः तेऽपि च सर्वे जननि तनूजाः ।
उज्ज्वलखेटाः कुवदति कायाः पावनि कस्ते प्रवदतु मायाः ।। ५६६।।

या महिमानं प्रथयति भूमिः पावनकीर्तिर्जलनिधिनेमिः ।
सेयमपीशे भवति सुपुत्री वासवजाये तव जनधात्री ।। ५६७।।

अङ्ग सखायो विरमतसङ्गाद्दुर्विषयाणां कृतमतिभङ्गात् ।
ध्यायत चित्ते धुतभयबीजं वासवजायाचरणसरोजम् ।। ५६८।।

पापमशेषं सपदि विहातुं शक्तिमनल्पामपि परिधातुम् ।
चेतसि साधो कुरु परिपूतं वासवजायापदजलजातम् ।। ५६९।।

ईश्वरि वन्द्यद्युतिभृतिमेधे काङ्क्षितनीराण्यसृजति मोघे ।
निर्मलकीर्तेस्तव शचि गानं शक्ष्यति कर्तुं तदुदकदानम् ।। ५७०।।

आमयवीर्याद्विगलति सारे जीवति किञ्चिद्रसनगनीरे ।
रक्षति जन्तुं तव शचि नाम प्राज्ञजनैरप्यगणितधाम ।। ६७१।।

मध्यमलोके स्यति शुचिरुग्रा राजसि नाके विभवसमग्रा ।
प्राणिशरीरे भवसि विचित्रा वासवजाये विविधचरित्रा ।। ५७२।।

व्योम्नि वपुस्ते विनिहतपापं विश्रुतलीलं तव दिवि रूपम् ।
कर्मवशात्ते भवति स भोगः प्राणिशरीरे भगवति भागः ।। ५७३।।

भारतभूमेः शुचमपहन्तुं श्रेष्ठमुपायं पुनरवगन्तुम् ।
वासवजाये दिश मम बुद्धिं पावनि माये कुरु कुरु सिद्धिम् ।। ५७४।।

सम्मदयन्तीर्बुधजनमेताः स्वर्गधरित्रीपतिसतिपूताः ।
मौक्तिकमालाः शृणु नुतिकर्तुर्भक्तिनिबद्धाः कविकुलभर्तुः ।। ५७५।।

## चतुर्थः सुमुखीपादः

अजितमिनाग्नितटिच्छशिभिः मम हृदयस्य तमः प्रबलम् ।
अमरपतिप्रमदाहसितं विमलघृणिप्रकरैर्हरतु ।।५७६।।

सुरनृपतेर्दयिता विनताहितशमनी लुलितामितरैः ।
वरकरुणावरुणालयदृङ्मम जननीमवतादवनिम् ।।५७७।।

पटुतपसो जमदग्निमुनेरिह सहधर्मचरीं भुवने ।
तनयनिकृत्तशिरः कमलां वरमतिमाविशदिन्द्रवधूः ।।५७८।।

यदुकुलकीर्तिविलोपभिया बतविनिगूह्य ऋतं कवयः ।
मुनिगृहिणी वधहेतुकथामितरपथेन भणन्ति मृषा ।।५७९।।

न सुरभिरर्जुनभूमिपतिर्भृगुतिलकस्य जहार स याम् ।
इयममृतांशुमनोज्ञमुखी परशुधरस्य जनन्यनघा ।।५८०।।

अतिरथमर्जुनभूमिपतिं सहपृतनं जमदग्निसुतः ।
युधि स विजित्य विशालयशाः पुनरपि मातरमाहृतवान् ।।५८१।।

परगृहवासकलङ्कवशान्निजगृहिणीं जमदग्निमुनिः ।
बतविनिहन्तुमना कलयंस्तनुभवमादिशदुग्रमनाः ।।५८२।।

पितृवचनादतिभक्तिमताप्यसुरवदात्मसुतेन हताम् ।
मुनिगृहिणीमनघेतिवदंस्तव वरदेऽविशदंश इमाम् ।।५८३।।

इदमविकम्प्यमतिप्रबलं प्रभवति कारणमार्यनुते ।
मुनिगृहिणीमनघां भणितुं शचि कलया यदि मामविशः ।।५८४।।

खलजनकल्पितदुष्टकथाश्रवणवशाद्व्यथितं हृदयम् ।
अथ चरितेऽवगते विमलस्मृतिवशतो मम याति मुदम् ।।५८५।।

तव महसा विशता कृपया मम शचि सूक्ष्मशरीरमिदम् ।
नृपरिपुमातृपवित्रकथा स्मरणपथं गमिता सपदि ।।५८६।।

विदधतुरासुरकृत्यमुभौ बहुलगुणामपि यद्गृहिणीम् ।
स मुनिरघातयदच्छकथां दशरथजश्च मुमोच वने ।।५८७।।

अपि विनिकृत्तशिराः शचि ते वरमहसा विशता सपदि ।
अलभत जीवितमम्ब पुनर्भुवनशुभाय मुनेस्तरुणी ।।५८८।।

यदि शिरसा रहिते वपुषि प्रकटतया विलसन्त्यसवः ।
यदि हृदयं सहभाति धिया किमिव विचित्रमितश्चरितम् ।।५८९।।

परशुधरस्य सवित्रि कला त्वयि पुरुहूतसरोजदृशः ।
स शिरसि काचिदभूद्रुचिरा विशिरसि भीमतमा भवति ।।५९०।।

परशुधरोऽर्जुनभूमिपतिं यदजयदम्ब तपोऽत्र तव ।
अभजत कारणतामनघे वरमुनिगेयपवित्रकथे ।।५९१।।

भगवति कृत्तशिरो भवती मथितवती नृपतीनशुभान् ।
प्रथनभुवि प्रगुणं भुजयोः परशुधराय वितीर्य बलम् ।।५९२।।

शुभतमकुण्डलपूर्वसतिः पदनतपातकसंशमनी ।
दिशतु निकृत्तशिराः कुशलं मम सुरपार्थिवशक्तिकला ।।५९३।।

निजसुतरङ्गपतेर्निकटे कृतवसतिर्नतसिद्धिकरी ।
दलितशिराः प्रतनोतु मम श्रियममरेश्वरशक्तिकला ।।५९४।।

भुवि ततसह्यनगान्तरगे शुभतमचन्द्रगिरौ वरदा ।
कृतवसतिः कुरुतान्मम शं भृगुकुलरामजनन्यजरा ।।५९५।।

अवतु विकृत्तशिराः पदयोर्भजकमनिन्द्यविचित्रकथा ।
दिनकरमण्डलमध्यगृहा सुरधरणीपतिशक्तिकला ।।५९६।।

गगनचरार्चितपादुकया पदनतसन्मतिबोधिकया ।
मम सततं शुचिरेणुकया परवदिदं कुलमम्बिकया ।।५९७।।

शमयितुमुग्रतमं दुरितं प्रथयितुमात्मनिगूढबलम् ।
गमयितुमग्र्यदशां स्वकुलं तव चरणाम्बुजमम्ब भजे ।।५९८।।

परवशगामशिवेन वृतां भरतधरां परिपातुमिमाम् ।
पटुमतिवाक्क्रियमातनुताद्गणपतिमभ्रहयप्रमदा ।।५९९।।

गणपतिदेवमहा.शजुषो गणपतिनामकविप्रकवेः ।
सुरपतिजीवसखीशृणुयाद्दशशतपत्रमुखी सुमुखीः ।।६००।।

।। षष्ठं त्रैष्टुभं शतकं समाप्तम् ।।

# अथ सप्तमं जागतं शतकम्

## प्रथमो द्रुतविलम्बितपादः

सुरमहीरमणस्य विलासिनी जलचरध्वजजीवितदायिनी ।
हरतु बोधदृगावरणं तमो हृदयगं हसितेन सितेन मे ।। ६०१।।

नमदमर्त्यकिरीटकृतैः किणैः कमठपृष्ठनिभे प्रपदेऽङ्किता ।
परिधुनोतु शची भरतक्षितेर्वृजिनजालमजालमकम्पनम् ।। ६०२।।

अतितरां नतपालनलोलया विबुधनाथमनोहरलीलया ।
किरिमुखीमुखशक्त्युपजीव्यया विदितयादितया गतिमानहम् ।। ६०३।।

घनहिरण्यमदापहरोचिषा वनरुहाननयाऽवनदक्षया ।
गतिमदिन्द्रमनोरथनाथया भुवनमेव न मे कुलमात्रकम् ।। ६०४।।

तनुषु वामनमूर्तिधरे विभौ तमनुयाच विराजति वामनी ।
शरणवाननयाम्बिकया लसत् करुणयाऽरुणया पदयोरहम् ।। ६०५।।

सकरुणा कुशलं मम रेणुकातनुरजा तनुतादुदितो यतः ।
युधि मुनिर्विदधौ परशुं दधज्जनपतीनपतीव्रभुजामदान् ।। ६०६।।

सुजनशत्रुरमाथि घनध्वनिः शचि सरात्रिचरस्तव तेजसा ।
जननि रामसहोदरसायकं प्रविशताऽविशतादधिकौजसा ।। ६०७।।

तव महःकलयाबलमास्तया जननि शुम्भनिशुम्भमदच्छिदा ।
जगदरक्ष्यत गोपकुलेशितुस्तनुजयाऽनुजयार्जुनसारथेः ।। ६०८।।

न विनिरूपयितुं प्रबभूव यां कविजनो विविधं कथयन्नपि ।
मुनिहृदम्बुजसौधतलेन्दिरा जयति सा यतिसाधुजनावनी ।। ६०९ ।।

इममयि त्रिदिवेश्वरि कल्किनं रुषमपोह्य सवित्रि विलोकितैः ।
सुरपतेर्द्विषतोऽघवतो लसन् मदनकैरवकैरवलोचने ।। ६१० ।।

स्मरदमर्त्यनृपालविलासिनीं प्रबलपातकभीतिविनाशिनीम् ।
प्रवणयान्तरनन्यधिया लसद्विनययानययामवतोर्मनः ।। ६११ ।।

भगवतीगगनस्थलचारिणी जयति सङ्गररङ्गविहारिणी ।
सुकृतशत्रुमतिभ्रमकारिणी हरिहयारिहयादिविदारिणी ।। ६१२ ।।

शरणवानहमर्जुनहासया भुवनभूपतिहारिविलासया ।
दिवि पुलोमजया धवलाचले गिरिजयाऽरिजयावितदेवया ।। ६१३ ।।

चरणयोर्धृतया विजयामहे वयमशेषजगन्नृपजायया ।
दिवि पुलोमजया धवलाचले नगजया गजयानविलासया ।। ६१४ ।।

अरिवधाय विधाय बुधाधिपं पटुभुजाबलभीषणमाजिषु ।
न भवती शचि गच्छति दुर्गतः क्वचन काचन कातरधीरिव ।। ६१५ ।।

सपदि मानसधैर्यहृतो जगज्जननि वज्रतनोर्ज्वलितार्चिषः ।
अरिजने प्रथमं तव वीक्षया सुरपतेरपतेजसि वि क्रमः ।। ६१६ ।।

न मननोचितमस्ति परं नृणां विबुधराजवधूपदपद्मतः ।
जगति दर्शनयोग्यमिहापरं न रमणी रमणीयमुखाब्जतः ।। ६१७ ।।

शरणवानहमस्मि पुरातनप्रमदया मुनिगेयचरित्रया ।
स्वबलचालितनाकजगन्नभो वसुधया सुधया सुरराड्दृशाम् ।। ६१८ ।।

अयमहं गतिमानतिशान्तया त्रिदिवभूमिपतिप्रियकान्तया ।
मनसि मौनिजनैरतिभक्तितो निहितया हितया सुकृतात्मनाम् ।। ६१९ ।।

विनयतः स्तुतया गमयाम्यहं जनिमतां जनयित्रि निशास्त्वया ।
प्रसृतया कुलकुण्डधनञ्जयाद्धृततनूततनूतनवेगया ।। ६२० ।।

सकृदमोघसरस्वतिसाधुधी हृदयवेद्यपदाम्बुजसौष्ठवे ।
मम शिवं सुमनः पृथिवीपतेः सुवदने वद नेत्रलसद्दये ।। ६२१ ।।

दुरवगाहपथे पतितं चिराज्जननि गम्यविलोकनलालसम् ।
स्वयममर्त्यनृपालमनोरमे सुनयने नयनेयमिमं जनम् ।। ६२२ ।।

अवतु नः स्वयमेव पटून् विपद्विमथनाय विधाय बुधेश्वरी ।
सकलमर्मसुवीतदयैः परैर्विनिहतानिह तापवतः शची ।। ६२३ ।।

सुरधरापतिजीवितनाथया स्वजननक्षितिरक्षणकर्मणि ।
पटुतमो जन एष विधीयतामिह तया हतया तु समूहया ।। ६२४ ।।

गणपतेः शृणुयादिममुज्ज्वलं द्रुतविलम्बितवृत्तगणं शची ।
सलिलराशिसुताभवनीभवद्भुवनपावनपादसरोरुहा ।। ६२५ ।।

## द्वितीयो जलोद्धतगतिपादः

हरित्सु परितः प्रसादमधिकं दधानममलत्विषां प्रसरणैः ।
महेन्द्रमहिलाविलासहसितं मदन्तरतमो धुनोतु विततम् ।। ६२६ ।।

प्रसूस्त्रिजगतः प्रिया मघवतः कृपाकलितया कटाक्षकलया ।
नितान्तमगतेर्विकुण्ठितमतेर्धुनोतु भरतक्षितेरकुशलम् ।। ६२७ ।।

पुरा शचि मतिस्त्वमीशितुरथो नभस्तनुमिता पृथङ्मतिमती ।
अनन्तरमभूः सरोजनयना तनुः सुरपतेर्विलोचनसुधा ।। ६२८ ।।

परत्र विगुणा सतोऽसि धिषणा नभस्तनुरिह प्रपञ्चमवसि ।
असि स्वरबला प्रिया सुरपतेरियत्तव शचि स्वरूपकथनम् ।। ६२९ ।।

प्रजापतिपदे पुराणपुरुषे स्मृता त्वमदितिः सुरासुरनुते ।
जनार्दनपदे रमासि परमे सदाशिवपदे शिवा त्वमजरे ।। ६३० ।।

उषा इनपदे स्वधाऽनलपदे पुरन्दरपदे त्वमीश्वरि शची ।
यथा रुचिविदुः पदानि कवयश्चितिश्च चितिमान्युवामृजुगिरा ।। ६३१ ।।

अमेयममलं पुराणपुरुषं तदीयविभवाभिधायिभिरिमे ।
वदन्ति कवयः पदैर्बहुविधैस्तथैव भवतीं ततो मतभिदाः ।। ६३२ ।।

नभश्च पवनः स्वरश्च परमस्तटिच्च वितता पतिश्च महसाम् ।
सुधांशुरनलो जलं च पृथिवी सवित्रि युवयोर्विभूतिपटली ।। ६३३ ।।

अपारबहुलप्रमोदलहरी सतः किलचितिः परत्र वितता ।
पुनर्वियदिदं परीत्य निखिलं जगन्ति दधती परा विजयते ।। ६३४ ।।

न यद्यपि परात्परे नभसि ते सरोजनयना वपुः पृथगजे ।
तथापि नमतां मतीरनुसरन्त्यमेयविभवे दधासि च तनूः ।। ६३५ ।।

सह त्रिभुवनप्रपालनकृता समस्तमरुतां गणस्य विभुना ।
सदा शशिमुखी शरीरभृदजा जगत्यदुरिते शची विजयते ।। ६३६ ।।

कुलं बहुभिदं बलं न भुजयोः कथं नु विपदस्तरेम भरताः ।
समर्थमधुना विपद्विधुतये तवाम्ब चरणं व्रजामि शरणम् ।। ६३७ ।।

समस्तमपि च स्वदेशविदुषां विधानपटलं बभूव विफलम् ।
अभाग्यदमनक्षमं तदधुना तवाम्ब चरणं व्रजामि शरणम् ।। ६३८।।

निजो मम जनो नितान्तमगतिर्न कुक्षिभरणेऽप्ययं प्रभवति ।
महेश्वरि कृपामरन्दमधुना तवाम्ब चरणं व्रजामि शरणम् ।। ६३९।।

अदृष्टकनकं कुलं मम चिरान्निरायुधमिदं निराशमभितः ।
स्वभावत इव प्रबद्धमभवत्तवाम्ब चरणं व्रजामि शरणम् ।। ३४०।।

अवीरचरितं विपालककथं निरार्षविभवं चिरान्मम कुलम् ।
इदं मम मनो निकृन्तति मुहुस्तवाम्ब चरणं व्रजामि शरणम् ।। ३४१।।

चिरात्स्मृतिपथादपि च्युतमजे तपोबलभवं तमार्षविभवम् ।
स्वदेशमधुना पुनर्गमयितुं तवाम्ब चरणं व्रजामि शरणम् ।। ६४२।।

हतं च विहतं धुतं च विधुतं रुदन्तमभितो विशिष्टकरुणे ।
इमं स्वविषयं शिवं गमयितुं तवाम्ब चरणं व्रजामि शरणम् ।। ६४३।।

क्षयाय सुकृतद्विषां विहरतां शिवाय च सतां प्रपञ्चसुहृदाम् ।
निजस्य मनसो बलाय च परे तवाम्ब चरणं व्रजामि शरणम् ।। ६४४।।

जयत्सु सुकृतं द्विषत्सु परितः सतामपि कुले बलेन रहिते ।
खलप्रिययुगे कलौ परिणते तवाम्ब चरणं व्रजामि शरणम् ।। ६४५।।

अभाति सुकृते निगूढविभवे विभाति दुरिते फलानि दिशति ।
विधानविकले मनस्यभयदे तवाम्ब चरणं व्रजामि शरणम् ।। ६४६।।

पटौ प्रतिभटे गदे प्रतिभये नतावनविधावतीव निपुणम् ।
सुपर्वभुवनक्षितीशदयिते तवाम्ब चरणं व्रजामि शरणम् ।। ६४७।।

अमर्त्यपटलीकिरीटमणिभाभुजङ्गकिरणं नितान्तमरुणम् ।
विपत्तिदमनं तमः प्रशमनं तवाम्ब चरणं व्रजामि शरणम् ।। ६४८।।

विनष्टविभवामिमां पुनरपि श्रियाविलसितां विधातुमजरे ।
स्वजन्मपृथिवीं स्वरीशदयिते दिशेर्गणपतेः कराय पटुताम् ।। ६४९।।

सुपर्ववसुधाधिनाथसुदृशो जलोद्धतगतिस्तवोऽयमनघः ।
कृतिर्गणपतेः करोतु विधुतिं भयस्य भरतक्ष्मातलजुषाम् ।। ६५०।।

## तृतीयः प्रमिताक्षरपादः

उदितं महेन्द्रमहिलावदने प्रसृतं करैर्दिशि दिशि प्रगुणैः ।
अहितं तमः प्रशमयद्यमिनां हसितं करोतु मम भूरि शिवम् ।। ६५१।।

भरतक्षितेस्तिमिरमाशु हरत्वरिचातुरीकृतविमोहमतेः ।
रविलक्षतोऽप्यधिकमंशुमती पविपाणिचित्तदयिता वनिता ।। ६५२।।

शशिलक्षशीतलकटाक्षसुधा तरुणार्ककोटिरुचिपादयुगा ।
हृदि मे विभातु मुनिगेयगुणा विबुधेन्द्रचित्तरमणी तरुणी ।। ६५३।।

कमनीयदीप्तसुकुमारतनुर्मननीयपावनपदाम्बुरुहा ।
विदधातु मे शिवमसद्विमुखी विबुधेन्द्रजीवितसखी सुमुखी ।। ६५४।।

अनुमानमूढपितृवाक्यवशात्तनयेन देवि विनिकृत्तशिराः ।
तव रेणुका विलसिता कलया गणनीयशक्तिरभवद्दशसु ।। ६५५।।

सकलामयप्रशमनं दुरितक्षयकारिकाङ्क्षितकरं च भवेत् ।
सुरसुन्दरी जनसमर्चितयोर्हृदि रेणुकाचरणयोः करणम् ।। ६५६।।

विनिहन्ति पापपटलं स्मरणाद्विधुनोति रोगनिवहं भजनात् ।
विदधाति वाञ्छितफलं स्तवनान्मनुजस्य रामजननी चरणम् ।। ६५७।।

शरणं व्रजामि नवरव्यरुणं चरणं तवाम्ब नृपजातिरिपोः ।
भरतक्षितेरवनतः प्रथमं मरणं ममेह न भवत्वधमम् ।। ६५८।।

स्मरणं चिरादविरतं विदधच्चरणस्य ते तरुणभानुरुचः ।
अयमस्तु रामजनयित्रिपटुः सुरकार्यमार्यविनुते चरितुम् ।। ५५९।।

अव भारतक्षितिममोघदये करणं भवत्विह तवैष जनः ।
निजयोः सवित्रि चरणाम्बुजयोर्न विहातुमर्हसि चिराद्भजकम् ।।
६६०।।

अविशस्त्वमिन्द्रदयिते किलतामपि यज्ञसेनतनयां कलया ।
अनघव्रतासु कवयः प्रथमां प्रवदन्ति यां बहुलवन्द्यगुणाम् ।। ६६१।।

भुवि भारतं पठति यः सुकृती कलुषं धुनोति सकलं किल सः ।
इयमम्ब शक्तिकुलराज्ञि तव द्रुपदस्य नन्दिनि कथामहिमा ।। ६६२।।

अभिमन्युमातरमनल्पगुणामतिलङ्घ्य चैक्षत हरिर्भवतीम् ।
अतिसौहृदेन यदिहार्यनुते तव हेतुरीड्यतमशक्तिकला ।। ६६३।।

गृहकार्यतन्त्रचतुरा गृहीणी सकलेन्द्रियामृतझरी रमणी ।
वरनीतिमार्गकथने सचिवोऽप्यभवस्त्वमम्ब कुरु वंशभृताम् ।। ६६४।।

न युधिष्ठिरस्य वरघोरतपो न धनञ्जयस्य पटु बाहुबलम् ।
अरिसङ्क्षयं कृतवती बहुलं तव वेणिकाऽपचरिता फणिनी ।। ६६५।।

असितापि कान्तिवसतिर्महती वनिताजनस्य च विमोहकरी ।

कुशलं ममाभ्रपतिशक्तिकला द्रुपदक्षितीन्द्रदुहिता दिशतु ।। ६६६।।

शिरसा समस्तजनपापभरं वहतो भवाय भुवि यामवृणोत् ।
अमराधिपः पतितपावनि तां भुवि कन्यकां तव विवेश कला ।। ६६७।।

कलया तवातिबलया कलिता पुरुषस्य योगमखिलाम्ब विना ।
अखिलेश्वरप्रहिततेज इयं सुतजन्मने किल दधावनघा ।। ६६८।।

सुररक्षकस्य मदयित्रि दृशां नररक्षकस्य जनयित्रि परे ।
कुलरक्षणाय कृतबुद्धिमिमं कुरु दक्षमद्भुतपवित्रकथे ।। ६६९।।

मुमुचुः कुले मम सुपर्वपतेस्तव चाभिधेयमिह मन्दधियः ।
अपराधमेतमतिघोरतरं जननि क्षमस्व मम वीक्ष्य मुखम् ।। ६७०।।

इह शारदेति यतिभिर्विनुता प्रथिता सुरेश्वरमनोदयिता ।
भुवि भाति कीर्तिवपुषा शचि या सुकथापि सा तव सवित्रि कला ।। ६७१।।

अरुणाचलेश्वरदरीवसतेस्तपतो मुनेर्गणपतेः कुशलम् ।
विविधावतारविलसच्चरिता वितनोतु सा विबुधराड्वनिता ।। ६७२।।

अरुणाचलस्य वरकन्दरया प्रतिघोषितं कलुषहारि यशः ।
विबुधाधिनाथरमणी शृणुयाद्गणनाथगीतमतिचारुनिजम् ।। ६७३।।

भरतक्षितेः शुभविधायिषु सा विबुधक्षितीशदयिता दयया ।
धनशक्तिबन्धुबलहीनमपि प्रथमं करोतु गणनाथमुनिम् ।। ६७४।।

मुदितामिमा विदधतु प्रमदां त्रिदिवाधिपस्य निपुणश्रवणाम् ।
अमितप्रकाशगुणशक्तिमजां प्रमिताक्षराः सुकविभूमिपतेः ।। ६७५।।

## चतुर्थस्तामरसपादः

दिशतु शिवं मम चन्द्रवलक्षस्तिमिरसमूहनिवारणदक्षः ।
कृतगतिरोधकपातकनाशः सुरधरणीशवधूस्मितलेशः ।। ६७६।।

अविदितमार्गतयातिविषण्णां गतिमपहाय चिराय निषण्णाम् ।
भरतधरामनिमेषधरत्री पतिगृहिणी परिपातु सवित्री ।। ६७७।।

भुवनमिदं भवतः किल पूर्वं यदमलरूपमनाकृतिसर्वम् ।
प्रकृतिरियं कुरुताददरिद्रामतिमतिशाततरां मम भद्रा ।। ६७८।।

सृजति जगन्ति विभौ परमे या सुबहुलशक्तिरराजत माया ।
प्रदिशतु सा मम कञ्चन योगं झटिति निराकृतमानसरोगम् ।। ६७९।।

प्रतिविषयं विकृतीतर सत्ता विलसति या मतिमद्भिरुपात्ता ।
इयमनघा परिपालितजातिं वितरतु मे विविधां च विभूतिम् ।। ६८०।।

प्रतिविषयग्रहणं परिपूतामतिरखिलस्य जनस्य च माता ।
मम विदधातु शुभं शुभनामा त्रिदिवनिवासिनरेश्वररामा ।। ६८१।।

गगनतनुर्जगतो विपुलस्य प्रभुपदमग्र्यमिता सकलस्य ।
प्रतिजनदेहमजा प्रवहन्ती मम हृदि नन्दतु सा विहरन्ती ।। ६८२।।

पटुकुलकुण्डधनञ्जयकीला समुदितहार्दविभाकरलीला ।
द्रुतशिर इन्दुकलामृतधारा जनमवतान्निजभक्तमुदारा ।। ६८३।।

विषयसमाकृतिरत्र पुरस्ताद्विमलतमा किल तत्र परस्तात् ।
भुवनमयी भुवनाच्च विभक्तामतिरनघाऽवतु मामतिशक्ता ।। ६८४।।

विषयपरिग्रहणेष्वतिसक्ता विषयविभूतिषु कापि विविक्ता ।
अखिलपतेर्मयि दीव्यतु शक्तिर्विमलतमा विधुतेतरशक्तिः ।। ६८५।।

दृशि दृशि भाति यदीयमपापं दिशि दिशि गन्तृ च वेत्तृ च रूपम् ।
भवतु शिवाय ममेयमनिन्द्या भुवनपतेर्गृहिणी मुनिवन्द्या ।। ६८६।।

जडकुलकुण्डदरीषु शयाना बुधकुलवह्निषु भूरिविभाना ।
हरिहयशक्तिरमेयचरित्रा मम कुशलं विदधातु पवित्रा ।। ६८७।।

दहरगताखिलमाकलयन्ती द्विदलगता सकलं विनयन्ती ।
दशशतपत्रगता मदयन्ती भवतु मयीन्द्रवधूर्विलसन्ती ।। ६८८।।

गृहयुगलीश्रिय आश्रितगम्या पदकमलद्वितयी बहुरम्या ।
मम हृदि भात्वविकुण्ठितयाना हरिसुदृशस्तरुणारुणभाना ।। ६८९।।

उपरि तता कुलकुण्डनिशान्ताज्ज्वलितधनञ्जयदीधितिकान्तात् ।
हरिहयशक्तिरियं मम पुष्टा द्रवयतु मस्तकचन्द्रमदुष्टा ।। ६९०।।

नभसि विराजति या परशक्तिर्मम हृदि राजति या वरशक्तिः ।
उभयमिदं मिलितं बहुवीर्यं भवतु सुखं मम साधितकार्यम् ।। ६९१।।

त्रिभुवनभूमिपतेः प्रिययोषा त्रिमलहरी सुरविष्टपभूषा ।
मम वितनोतु मनोरथपोषं दुरितविपत्तिततेरपि शोषम् ।। ६९२।।

पवनजगत्प्रभुपावनमूर्तिर्जलधरचालनविश्रुतकीर्तिः ।
मम कुशलाय भवत्वरिभीमा जननवतां जननी बहुधामा ।। ६९३।।

मम सुरराजवधूकलयोग्रा खलजनधूननशक्तनखाग्रा ।
दमयतु कृत्तशिराः कलुषाणि प्रकटबला हृदयस्य विषाणि ।। ६९४।।

कुलिशिवधूकलया परिपुष्टा बुधनुतसद्गुणजालविशिष्टा ।
मम परितो विलसद्विभवानि द्रुपदसुता विदधातु शिवानि ।। ६९५।।

सुरजनराड्दयितांशविदीप्ते पदकमलाश्रितसाधुजनाप्ते ।
दुरितवशादभितो गतभासं मनुजकुमारजनन्यवदासम् ।। ६९६।।

अमरनरेश्वरमन्दिरनेत्री सुमशरजीवनसुन्दरगात्री ।
भवतु शची विततस्वयशस्सु प्रतिफलिता गणनाथवचस्सु ।। ६९७।।

विकसतु मे हृदयं जलजातं विलसतु तत्र शचीस्तुतिगीतम् ।
स्फुरतु समस्तमिहेप्सितवस्तु प्रथिततमं मम पाटवमस्तु ।। ६९८।।

कुरु करुणारससिक्तनिरीक्षे वचनपथातिगसद्गुणलक्षे ।
शचि नरसिंहजमाहितगीतं भरतधरामवितुं पटुमेतम् ।। ६९९।।

सुललिततामरसैः प्रसमाप्तं वरनुतिबन्धमिमं श्रवणाप्तम् ।
जननि निशम्य सुसिद्धमशेषं हरिललने मम कुर्वभिलाषम् ।। ७००।।

।। इति श्रीभगवन्महर्षिरमणान्तेवासिनो वासिष्ठस्य नरसिंहसूनोः
गणपतेः कृतौ इन्द्राणीसप्तशती समाप्ता।।

# प्रचण्डचण्डीत्रिशती

## प्रथमं शतकम्

### प्रथमो मुकुलस्तबकः

वज्रं जम्भभिदः सर्वस्वं नभसः ।
वन्दे वैरिसहं विद्युज्ज्योतिरहम् ।। १ ।।

सा शक्तिर्मरुतामीशानस्य तता ।
व्योमागाररमा सा देवी परमा ।। २ ।।

सूक्ष्मं व्यापिमहो दृश्यं वारिधरे ।
तत्त्वं ते मरुतां राज्ञः पत्निपरे ।। ३ ।।

द्वाभ्यां त्वं वनितारूपाभ्यां लससि ।
एका तत्र शची चण्डाचण्ड्यपरा ।। ४ ।।

एका कान्तिमती भर्तृस्तल्पसखी ।
अन्या वीर्यवती प्रायो युद्धसखी ।। ५ ।।

एका मोहयते शक्रं चन्द्रमुखी ।
अन्या भीषयते शत्रूनर्कमुखी ।। ६ ।।

एकस्यां तटितो रम्या दीप्तिकला ।
अन्यस्यां सुतरामुग्रा शक्तिकला ।। ७ ।।

एकस्याः सदृशी सौन्दर्ये न परा ।
अन्यस्यास्तु समा वीर्ये नास्त्यपरा ॥८॥

एका सञ्चरति स्वर्गे भोगवती ।
अन्या भाति नभोरङ्गे योगवती ॥९॥

एका वा दशयोः भेदेन द्विविधा ।
इन्द्राणी विबुधैः गीता पुण्यकथा ॥१०॥

चण्डि त्वं वरदे पिण्डे कुण्डलिनी ।
गीता च्छिन्नशिराः प्राज्ञैर्वैभविनी ॥११॥

आहुः कुण्डलिनीं यन्मूर्ध्ना वियुताम् ।
चित्रा सा वचसो भङ्गी बुद्धिमताम् ॥१२॥

पुत्रच्छिन्नशिराः पुण्यायाऽब्जमुखी ।
आविक्षत् किल तां शक्तिः शक्रसखी ॥१३॥

तस्माद्वायमवच्चित्ताम्भोजरमा ।
उक्ता कृत्तशिराः सा शक्तिः परमा ॥१४॥

ओजीयस्यबला तुल्या कापि नते ।
राजारेर्जननि स्वर्नारीविनुते ॥१५॥

यावन्तोऽवतराः शक्तेर्भूमितला ।
वीर्येणास्यधिका तेषु त्वं विमले ॥१६॥

प्रागेव त्वयि सत्यैन्द्रीशक्तिकला ।
व्यक्ताऽभूच्छिरसि च्छिन्ने भूरिबला ॥१७॥

त्वं छिन्ने महसां राशिः शक्तिरसि ।
हुङ्कारेण रिपुव्रातं निर्दहसि ॥१८॥

भोगासक्तरतिग्राहाङ्कासनगा ।
बालार्कद्युतिभृत्पादाम्भोजयुगा ॥१९॥

छिन्नं पाणितले मूर्धानं दधती ।
प्राणानात्मवशे संस्थाप्यानहती ॥२०॥

स्फारास्येन पिबन्त्युल्लोलानसृजः ।
ध्वस्तानादधती दृप्तान् भूमिभुजः ॥२१॥

डाकिन्याऽनघया वर्णिन्या च युता ।
रामाम्बाऽवतु मां दिव्यं भावमिता ॥२२॥

कार्यं साधयितुं वीर्यं वर्धय मे ।
चित्तं स्वात्मनि च च्छिन्ने स्थापय मे ॥२३॥

योगं मे विषयारात्यब्धिं तरितुम् ।
चित्तं देवि कुरु त्वं साक्षाद्वदितुम् ॥२४॥

मान्दारैरिव मे गायत्रैर्विमलैः ।
छिन्ने सिध्यतु ते पादार्चा मुकुलैः ॥२५॥

## द्वितीयो बृहतीस्तबकः

निखिलामयतापहरी निजसेवकभव्यकरी ।
गगनामृतदीप्तिझरी जयतीश्वरचिल्लहरी ॥२६॥

विपिने विपिने विनुता नगरे नगरे नमिता ।
जयति स्थिरचित्तहिता जगतां नृपतेर्दयिता ॥ २७॥

मतिकैरविणीन्दुकला मुनिहृत्कमले कमला ।
जयति स्तुतिदूरबला जगदीशवधूर्विमला ॥ २८॥

कलिपक्षजुषां दमनी कलुषप्रततेः शमनी ।
जयति स्तुवतामवनी सदया जगतो जननी ॥ २९॥

अतिचण्डिसुपर्वनुते बलपौरुषयोरमिते ।
जननं सुजनावनिते जगतामुपकारकृते ॥ ३०॥

सकलामयनाशचणे सततं स्मरतः सुगुणे ।
मम कार्यगतेः प्रथमं मरणं न भवत्वधमम् ॥ ३१॥

मरणस्य भयं तरितुं करुणारसवाहिनि ते ।
स्मरणाद्रसयामि गलच्चरणाम्बुरुहादमृतम् ॥ ३२॥

वनितावपुषश्चरणं जगदम्ब न वेद्मि तव ।
वियदग्नितनोश्चरणं शिरसेह वहामि सदा ॥ ३३॥

शतशः प्रसृतैश्चरणैः मुनिमस्तकवीथिषु सा ।
विपुले गगने वितता चरति त्रिदशेशसखी ॥ ३४॥

विशति प्रविधाय पथश्चरणस्य विभाम्बगुहाम् ।
विहितस्य ममेहशिरस्यजरे जगदीश्वरि ते ॥ ३५॥

चरणस्य विभा किमु ते तव काचन वीचिरुत ।
विविधा विदधाति कथाः प्रविशन्त्ययि भक्तगुहाम् ॥ ३६॥

निजवीचिविलासपदं मम कायमिदं जगति ।
करणं सुरकार्यकृते तव निस्तुलभे भवतु ।। ३७।।

मम वर्ष्मणि हीनबले यदि कश्चन लोप इव ।
तमपोह्यपटिष्ठतमं कुरु विष्टपमातरिदम् ।। ३८।।

सहतामिदमम्बवपुस्तव नाट्यमपारजवम् ।
बहिरन्तरशत्रुसहं भजतां बहुलं च बलम् ।। ३९।।

पृथिवी च सहेत न ते तटिदीश्वरि नाट्यजवम् ।
करुणा यदि देवि न ते वपुषामिह का नु कथा ।। ४०।।

तव शक्तिझरीपतनं बहिरद्भुतवृष्टिरिव ।
इदमन्तरनन्तबले मदिरारसपानमिव ।। ४१।।

परमिक्षुरसो मधुरो मदिरामदकृत्परमा ।
मधुरा मदकृच्च भृशं तव शक्तिकलालहरी ।। ४२।।

रसनेन्द्रियमात्रमुदं वर इक्षुरसः कुरुते ।
बहिरन्तरपि प्रमदं तव शक्तिकलालहरी ।। ४३।।

वपुषो मनसश्चधियो बलमद्भुतमादधती ।
प्रमदं च जयत्यजरे तव शक्तिकलालहरी ।। ४४।।

तव शक्तिकलालहरी परिशोधयते भुवि यम् ।
विदुरागमसारविदः सनिमेषममर्त्यमिमम् ।। ४५।।

लहरीमखिलाम्ब विना तव योऽनुभवं वदति ।
अयि वञ्चित एष मृषा विषयेण महाविभवे ।। ४६।।

सततालहरी यदि ते बहिरन्तरपि प्रगुणा ।
भवबन्धचयः शिथिलो भुवि जीवत एव भवेत् ।। ४७।।

इह तावदपारबले सकला अपि योगकथाः ।
तव यावदनन्तजुषो न पवित्रझरीपतनम् ।। ४८।।

विषयारिविनाशविधौ रमणीयमुपायमजे ।
कथयेश्वरि मे विशदं तव नाम्ब न साध्यमिदम् ।। ४९।।

गणनाथकवेः कृतिभिः बृहतीभिरिमाभिरजा ।
परितृप्यतु चण्डवधूः कपटागगनाग्निकला ।। ५०।।

## तृतीयः सुप्रतिष्ठास्तबकः

चण्डचण्डिकां बालभानुभाम् ।
नौमि देवताराजवल्लभाम् ।। ५१।।

नाभिमण्डलश्वेतपद्मगे ।
चण्डदीधितेर्मण्डले स्थिताम् ।। ५२।।

सूक्ष्मनाडिकादेहधारिणीम् ।
घोरपातकव्रातहारिणीम् ।। ५३।।

उग्रविक्रमच्छिन्नमस्तकाम् ।
दग्धवासनाघासजालकाम् ।। ५४।।

नौमि सद्धियं सिद्धसंस्तुताम् ।
वज्रधारिणः शक्तिमद्भुताम् ।। ५५।।

प्राणिनां तनौ तन्तुसन्निभाम् ।
अम्बरस्थले व्यापकप्रभाम् ।। ५६ ।।

चारुवर्णिनीप्रीतिलालिताम् ।
भीमडाकिनीवीर्यनन्दिताम् ।। ५७ ।।

दीप्यदक्षिभाभीषितासुराम् ।
नौमि वज्रिणः शक्तिमक्षराम् ।। ५८ ।।

या विशत्तपोध्वस्तपातकाम् ।
रेणुकां सुतच्छिन्नमस्तकाम् ।। ५९ ।।

नौमि तामरिव्रातमर्दिनीम् ।
नाकमेदिनीपालभामिनीम् ।। ६० ।।

देवसुन्दरीमस्तलालितम् ।
अम्बिकापदं भातु मे हितम् ।। ६१ ।।

शोध्यतामयं सर्वधीपुषा ।
लोकधात्रि ते पादरोचिषा ।। ६२ ।।

कोटिशस्तव प्राज्यशक्तयः ।
विद्युदम्बिके पादपङ्क्तयः ।। ६३ ।।

तासु विक्रमाधायिचेष्टितम् ।
तासु विष्टपज्ञानमद्भुतम् ।। ६४ ।।

सर्वतोऽम्ब ते पादचेष्टितम् ।
वेत्ति तत्कृती नो जडः कृतम् ।। ६५ ।।

वेत्ति यः कृती तत्र तद्बलम् ।
वेद यो नना तत्र नो फलम् ।। ६६।।

अर्पयेत्तनुं यः सवित्रि ते ।
शक्तिवैभवं तत्र पण्डिते ।। ६७।।

पूरुषो भवन्नूर्मिरच्युते ।
मत्तनुं स्त्रियं सम्भुनक्तु ते ।। ६८।।

सर्वतो गतिर्भामदम्ब ते ।
मद्गुहान्तरे भातु विश्रुते ।। ६९।।

उग्रवैभवाशक्तिरन्तरे ।
भातु ते पदप्रेयसःपरे ।। ७०।।

चण्डि ते पुनश्चेत्प्रचण्डता ।
कीदृगम्बिके सा महोग्रता ।। ७१।।

मर्त्यहस्तिनं मस्तभेदिनी ।
शक्तिरम्ब ते पातु पावनी ।। ७२।।

उत्तमोत्तमा चित्तचिन्त्यताम् ।
कृत्तमस्तका मत्तकाशिनी ।। ७३।।

आत्मवैरिणां नाशने विधिम् ।
ब्रूहि मे जनन्यन्तरावधिम् ।। ७४।।

चेतसोऽम्ब ते जायतां हितम् ।
सौप्रतिष्ठसद्गीतमद्भुतम् ।। ७५।।

## चतुर्थो नरमनोरमास्तबकः

अमरपालिनी दितिजनाशिनी ।
भुवनभूपतेर्जयति भामिनी ।। ७६।।

अतिशुभा नभस्तलविसारि भा ।
जगदधीशितुर्जयति वल्लभा ।। ७७।।

सुरमहीपतेर्हृदयमोहिनी ।
कपटकामिनी जयति मायिनी ।। ७८।।

जयति कुण्डलीपुरनिकेतना ।
तटिदधीश्वरी तरललोचना ।। ७९।।

विमलमस्तकैर्हृदि विधारिता ।
दलितमस्तका जयति देवता ।। ८०।।

जयति विद्युतो युवतिभूमिका ।
इह खलान्तकृज्जयति रेणुका ।। ८१।।

अमितविक्रमे जयजयाम्बिके ।
परशुधारिणो जननि रेणुके ।। ८२।।

विनतपालिके धरणिकालिके ।
जनपतिद्विषो जननि पाहि माम् ।। ८३।।

मम हृदम्बुजं तव पदाम्बुजे ।
भजतु लीनतां कपटनार्यजे ।। ८४।।

करुणया क्रियाद्भगवती शुभा ।
मम मुदावहं मदमुदारभा ।।८५।।

तव मदे वृषा जयति दानवान् ।
तव मदे हरो नटति मोदवान् ।।८६।।

तव मदे रविस्तपति तेजसा ।
तव मदे स्वभूरवति चौजसा ।।८७।।

तव मदे शशी रमयतेऽखिलम् ।
तव मदेऽनिलः प्रथयते बलम् ।।८८।।

तव मदेऽनलो जगति राजते ।
तव मदे मुनिर्निगममीक्षते ।।८९।।

तव मदे धरा भ्रमति मेदिनी ।
तव मदे तनुर्मम च मोदिनी ।।९०।।

दहनकीलवन्निरुपमोग्रता ।
शशिमयूखवत्परमसौम्यता ।।९१।।

गगनदेशवत्स्थितिरचञ्चला ।
तपनरश्मिवद्गतिरपङ्किला ।।९२।।

अमृतवन्मदः पवनवद्बलम् ।
तव तरङ्गके किमिव नो फलम् ।।९३।।

तव नवामहामदविधायिका ।
अघहरीसुरा जयति वीचिका ।।९४।।

तव सुचित्तिका जननि वीचिका ।
अमृतवर्षिणी जयति हर्षिणी ।।९५।।

अमरराज्ञिदेव्यसुरविघ्नहा ।
असुरुपासकानवति ते कला ।।९६।।

अनुगृहीतवाक्तव गभस्तिना ।
सकलसिद्धिराड् भवति देविना ।।९७।।

सततचिन्तनात्तव गुहान्तरे ।
नियतचेतसो जगदिदं करे ।।९८।।

जननि मे विधिं कथय भीषणे ।
विषयशात्रवव्रजविदारणे ।।९९।।

तव मनोरमे सुरपतेरिमाः ।
विदधतां मुदं नरमनोरमाः ।।१००।।

# द्वितीयं शतकम्

## पञ्चमो रथोद्धतास्तबकः

कृत्तमस्तमपिशातकर्तरीं पाणिपद्मयुगलेन बिभ्रतीम् ।
संस्मरामि तरुणार्करोचिषं योषितं मनसि चण्डचण्डिकाम् ।।१०१।।

चण्डचण्डि तव पाणिपङ्कजे यन्निजं लसति कृत्तमस्तकम् ।
देवि सूचयति चित्तनाशनं तत्तवेन्द्रहृदयाधिनायिके ।।१०२।।

दीप्तविग्रहलतां महाबलां वह्निकीलनिभरक्तकुन्तलाम् ।
संस्मरामि रतिमन्मथासनां देवतां तरुणभास्कराननाम् ।।१०३।।

रश्मिभिस्तव तनूलताकृता रश्मिभिस्तव कृताश्च कुन्तलाः ।
रश्मिभिस्तव कृतं ज्वलन्मुखं रश्मिभिस्तव कृते च लोचने ।।१०४।।

देवि रश्मिकृतसर्वविग्रहे दृष्टिपातकृतसाध्वनुग्रहे ।
अम्बरोदवसिते शरीरिणामम्ब पाहि रविबिम्बचालिके ।।१०५।।

यत्तवासनमशेषमोहनौ विद्युदक्षिरतिसूनसायकौ ।
एतदिन्द्रसखि भाषते त्वया तावुभावपि बलादधः कृतौ ।।१०६।।

दृष्टिरेव तव शस्त्रमाहवे शात्रवस्तु तव न क्षमः पुरः ।
वस्त्रमम्ब दिश एव निर्मलाः प्रेक्षितुं भवति न प्रभुः परः ।।१०७।।

चक्षुषां दशशतानि ते रुचिं पातुमेव परमस्य वज्रिणः ।
भास्वतः करसहस्रमम्बिके लालनाय तव पादपद्मयोः ।।१०८।।

शूलमग्नितिलकस्य धूर्जटेः चक्रमच्छजलजातचक्षुषः ।
वज्रमम्ब मरुतां च भूपतेः तेजसस्तव कृतानि भागकैः ।।१०९।।

भैरवीचरणभक्तबान्धवी तारिणी च सुरपक्षधारिणी ।
कालिका च नतपालिकाऽपराश्चण्डचण्डि तव भीमभूमिकाः ।।११०।।

रक्ष मे कुलमतीन्द्रिये तते राक्षसादिनि सुरैः समर्चिते ।
पुत्रशिष्यसहितोऽहमम्ब ते पावनं पदसरोरुहं श्रये ।।१११।।

ऐन्द्रिदेवि भवती महाबला छिन्नमस्तयुवतिस्तु ते कला ।
सर्वलोकबलवित्तशेवधेः प्रेक्षितास्ति तव को बलावधेः ।।११२।।

येयमम्ब रुचिरुज्ज्वलानने या च काचन विभा विभावसौ ।
तद्द्वयं तव सवित्रि तेजसो भूमिनाकनिलयस्य वैभवम् ।।११३।।

प्राणदा तव रुचिर्जगत्त्रये प्राणहृच्च बत कार्यभेदतः ।
वैभवं भुवनचक्रपालिके को नु वर्णयितुमीश्वरस्तव ।।११४।।

उद्भवस्तवविपाकवैभवे नाशनं च जगदम्ब देहिनाम् ।
यौवनं नयनहारिनिर्मलं वार्धकं च विततातुलप्रभे ।।११५।।

निर्बलो भवति भूतले युवा यच्च देवि जरठो भवेद्बली ।
तद्द्वयं तव विचित्रपाकतः पाकशासनसखि क्षरेतरे ।।११६।।

वार्धकेन बलकान्तिहारिणा दारुणेन कटुकार्यकारिणा ।
ग्रस्तमेतमधुना पुनः कुरु त्राणदे युवकवत्पदाश्रितम् ।।११७।।

भोगलालसतया न नूतनं देवि विक्रममपारमर्थये ।
अत्र मे वपुषि लास्यमम्ब ते सोढुमेव मम सेयमर्थना ।।११८।।

शक्तिरम्ब मम काचिदन्तरे या त्वयैव निहितालमल्पका ।
वृद्धिमेत्य सहतामियं परां बाह्यशक्तिमिह निर्गलज्झराम् ।।११९।।

अम्ब ते नरसुरासुरस्तुते दिव्यशक्तिलहरीविशोधितम् ।
पातकानि जहतीव मामिमं कामयन्त इव सर्वसिद्धयः ।।१२०।।

शक्तिरिन्द्रसखि चेन्न ते मृषा भक्तिरीश्वरि न मे मृषा यदि ।
उल्लसन्तु रतिकन्तुपीठिके शीघ्रमेव मयि योगसिद्धयः ।।१२१।।

अस्तु भक्तिरखिलाम्ब मे न वा शक्तिरेव तव सम्प्रशोध्य माम् ।
देवकार्यकरणक्षमं बलादादधातु विदधातु चामृतम् ।।१२२।।

आस्यमम्ब तव यद्यपीक्षितं लास्यमेतदनुभूयते मया ।
पादघाततिचूर्णितान्यजे यत्र यान्ति दुरितानि सङ्क्षयम् ।।१२३।।

स्वीयशक्तिलहरीविलासिने किङ्कराय पदपद्मलम्बिने ।
भाषतां विषयवैरिदारणे भङ्गवर्जितमुपायमम्बिका ।।१२४।।

निर्मले करुणया प्रपूरिते सन्ततं विकसिते महामहे ।
अम्बिकाहृदि वितन्वतामिमाः सम्प्रसादमतुलं रथोद्धताः ।।१२५।।

## षष्ठः स्वागतास्तबकः

योगिने बलमलं विदधाना सेवकाय कुशलानि ददाना ।
अस्तु मे सुरधरापतिशक्तिश्चेतसश्च वपुषश्च सुखाय ।।१२६।।

कार्यमस्ति मम किञ्चन सत्यं तज्जयाय विलपामि च सत्यम् ।
एवमप्यकपटैव रतिर्मे वज्रपाणिसखि ते पदपद्मे ।।१२७।।

श्रद्धया तव नुतिं विदधामि श्रद्धया तव मनुं प्रजपामि ।
श्रद्धया तव विजृम्भितमीक्षे श्रद्धया तव कृपां च निरीक्षे ।।१२८।।

विद्युदेव भवती च मरुत्वान् विद्युदेव गिरिशो गिरिजा च ।
विद्युदेव गणपः सह सिद्ध्या षट्कभेद इह कार्यविशेषैः ।।१२९।।

पूरुषश्च वनितेति विभेदः शक्तशक्तिभिदया वचनेषु ।
तेज एव खलु विद्युति शक्तं वीर्य एव जगदीश्वरि शक्तिः ।।१३०।।

विद्युदम्बरभुवि ज्वलतीशे शब्दमम्ब कुरु ते च सुसूक्ष्मम् ।
इन्द्ररुद्रयुगलव्यवहारे कर्मयुग्ममिदमीश्वरि बीजम् ।।१३१।।

वैद्युतस्य भवसि ज्वलतोऽग्नेरम्ब शक्तिरसतां दमनि त्वम् ।
तस्य नादवत आगमगीता कालिका भवति शक्तिरभीता ।।१३२।।

तेजसो रुचिरभीमकलाभ्यां यद्वदीश्वरि शची भवती च ।
एवमाश्रितजनावनि गौरी कालिका च निनदस्य कलाभ्याम् ।।१३३।।

वैद्युतोऽग्निरखिलेश्वरि पिण्डे मूलतामरसपीठनिषण्णः ।
इन्द्रियं भवति वागिति देवं यं विदो गणपतिं कथयन्ति ।।१३४।।

ग्रन्थिभेदविकचे सरसीजे जृम्भमाणमिह वैद्युतवह्निः ।
यां रुचिं प्रकटयत्यतिवीर्यां सैव सिद्धिरिति काचन लक्ष्मीः ।।१३५।।

विद्युदेव भवती ननु भान्ती विद्युदेव नगजा निनदन्ती ।
विद्युदेव तपसो विलसन्ती विग्रहेषु परमेश्वरि सिद्धिः ।।१३६।।

नैव केवलमुदारचरित्रे विद्युदद्भुततमा त्रिविभूतिः ।
वैभवं बहु सहस्रविभेदं को नु वर्णयतु पावनि तस्याः ।।१३७।।

वैद्युतं ज्वलनमीश्वरि हित्वा नैव दैवतमभीष्टतमं नः ।
तद्विभूतिगुणगानविलोला भारती जयतु मे बहुलीला ।।१३८।।

तेजसश्च सहसश्च विभेदाद्या तनुस्तव भवत्युभयात्मा ।
तद्वयं च मयि चित्रचरित्रे जृम्भतां नरजगत्कुशलाय ।।१३९।।

प्रायशो निगमवाचि पुमाख्या तन्त्रवाचि वरदे वनिताख्या ।
प्राणिनां जननि ते विबुधानां तत्र हेतुरजरे रुचिभेदः ।।१४०।।

अत्र सिद्धिरुदिता मम देहे भूमिका भुवनधात्रि तवान्या ।
आह्वयत्यधिकशक्तिकृते त्वां त्वं च सम्प्रविश देहगुहां नः ।।१४१।।

जृम्भतामियमितः कुलकुण्डादन्तरिक्षतलतोऽवतर त्वम् ।
उल्लसन्त्ववलसन्तु च देहे वीचयोऽत्र भगिनीद्वितयस्य ।।१४२।।

केवलं न सहसा महनीये तेजसा च वरदेऽवतर त्वम् ।
अत्र सिद्धिमपि केवलवीर्योल्लासिनीं जननि योजय भासा ।।१४३।।

छिन्नमुज्ज्वलतटित्प्रभनेत्रं कण्ठरक्तजलसङ्ग्रहपात्रम् ।
मस्तकं तव सहेश्वरि धन्यं मस्तकं मम करोतु विशून्यम् ।।१४४।।

मोचिताश्रितगुहान्तरबन्धः प्राणवांस्तव सवित्रि कबन्धः ।
वासनाकुसुमतल्पकसुप्तां सम्प्रबोधयतु मे मतिमाप्ताम् ।।१४५।।

देवपूज्यचरणा तव चेटी निर्विबन्धकरुणापरिपाटी ।
वज्रपाणिसखि शोकदरिद्रं वर्णिनी भणतु मे बहुभद्रम् ।।१४६।।

चण्डचण्डि तव युद्धवयस्या योगिवेद्यनिजवीर्यरहस्या ।
चेतसश्च भुजयोश्च समग्रं डाकिनी दिशतु मे बलमुग्रम् ।।१४७।।

मन्मथेन सह रागरसार्द्रा पूरुषायितरता रतिरीड्या ।
आसनं तव वशीकुरुतान्मे सर्वलोकमपि वज्रशरीरे ॥१४८॥

दृप्यतां विषयवैरिगणानां मर्दनाय रमणीयमुपायम् ।
अम्ब शीघ्रमभिधाय नय त्वं मामिमं चरणपङ्कजबन्धुम् ॥१४९॥

तेजसा च सहसा च विभान्ती पुष्करे च यमिनां च तनूषु ।
सम्मदं भजतु वासवशक्तिः स्वागताभिरमलाभिरिमाभिः ॥१५०॥

## सप्तम इन्द्रवज्रास्तबकः

ज्ञानाय हानाय च दुर्गुणानां भानाय तत्त्वस्य परस्य साक्षात् ।
देवीं प्रपद्ये सुरपालशक्तिमेकामनंशामभितो विभान्तीम् ॥१५१॥

ईशोऽशरीरो जगतां परस्तात् देवी खकाया परितो जगन्ति ।
पूर्वो विशुद्धो गुणगन्धशून्यः स्थानं गुणानामपराऽखिलानाम् ॥१५२॥

आक्रम्य लोकं सकलं विभाति नो केवलं भूरि विभूतिरम्बा ।
शुद्धा परस्तादपि नाथचित्ति रूपा विपापा परितश्चकास्ति ॥१५३॥

त्रैलोक्यभूजानिरणोरणिष्ठस्तस्यात्मशक्तिर्महतो महिष्ठा ।
एतद्रहस्यं भुवि वेद यो ना तत्त्वप्रसङ्गेषु न तस्य मोहः ॥१५४॥

ज्ञानं परं धर्मवदीशतत्त्वं धर्मात्मकं ज्ञानमजास्वरूपम् ।
शक्तीशयोर्भक्तुमशक्ययोरप्येवं विभागो वचसा व्यधायि ॥१५५॥

दृश्यस्य सर्वस्य च भोगकाले धर्मी च धर्मश्च विभाति बोधः ।
अन्तः समाधावयमेकरूपः शक्तीशभेदस्तदसावनित्यः ॥१५६॥

धर्मः परस्तात्परमेश्वरी या धर्मित्वमेषा जगति प्रयाति ।
यावज्जगज्जीवितमप्रणाशमाकाशमाश्रित्य महच्छरीरम् ।।१५७।।

व्यक्तिं खकायां प्रजगुः पुमांसमेके परे क्लीबमुदाहरन्ति ।
अस्माकमेषा परमात्मशक्तिर्माता समस्तस्य च कापि नारी ।।१५८।।

चिद्रूपमत्यन्तसुसूक्ष्ममेतत् ज्योतिर्यदाकाशशरीरमग्र्यम् ।
प्राणः स एव प्रणवः स एव वह्निः स एवाम्बरदेशवासी ।।१५९।।

वायुश्च रुद्रश्च पुरन्दरश्च तस्यैव विश्वं दधतः पुमाख्याः ।
शक्तिश्च काली च महाप्रचण्डचण्डी च योषित्प्रवराह्वयानि ।।१६०।।

अत्रापि धर्मी पुरुषः परेषां धर्मस्तु नारी विदुषां मतेन ।
एषोऽपि वाचैव भवेद्विभागः शक्यो विधातुं न तु वस्तुभेदात् ।।१६१।।

त्वं देवि हन्त्री महिषासुरस्य शुम्भं सबन्धुं हतवत्यसि त्वम् ।
त्वं योगनिद्रामधुसूदनस्य भद्रासि शक्तिर्बलवैरिणस्त्वम् ।।१६२।।

कालस्य लीलासहचारिणी त्वं वामाङ्गमस्यन्धकवैरिणस्त्वम् ।
सिद्धिस्त्वमश्रान्ततपोभिगम्या बुद्धिस्त्वमक्षुद्रमनुष्यनम्या ।।१६३।।

विद्युत्त्वमाकाशपथे चरन्ती सूर्यप्रभा त्वं परितो लसन्ती ।
ज्वाला कृशानोरसि भीमलीला वेलातिगा त्वं परमस्य चित्तिः ।।१६४।।

भेदाः सहस्त्रं तव देवि सन्तु त्वं मूलशक्तिर्मम मातरेका ।
स्तोत्राणि ते बुद्धिमतां विभूतिद्वारा बहूनीव विभान्ति लोके ।।१६५।।

उग्राणि रूपाणि सहस्त्रशस्ते सौम्यानि चाशेषसवित्रि सन्ति ।
व्यक्तित्वमेकं तव भूरिशक्तिव्यक्तीः पृथक् च प्रददाति तेभ्यः ।।१६६।।

कुर्वन्ति ताः पावनि विश्वकार्यं सर्वं च लोकाम्ब विभूतयस्ते ।
स्ववैरिणां च प्रतिसन्धिकालं गर्वं हरन्ति क्षणदाचराणाम् ॥१६७॥

चण्डी प्रचण्डा तव या विभूतिः वज्रात्मिका शक्तिरपारसारा ।
सा सम्प्रदायातुलमम्ब वीर्यं देवी क्रियान्मां कृतदेवकार्यम् ॥१६८॥

आविश्य या मां वपुषो गुहायां चित्राणि ते शक्तिरजे करोति ।
सा का तव प्राज्यविभूतिमध्ये सद्ध्येयरूपे विशदीकुरुष्व ॥१६९॥

संशोधनायैव कृतिः किमस्याः सञ्चालनायापि किमु क्रियाणाम् ।
शक्त्यै किमेषा विदधाति चेष्टामाहोस्विदच्छां च मतिं प्रदातुम् ॥१७०॥

प्राणप्रदा भीमतमा च शक्तिर्या कृत्तशीर्षा सहसाविवेश ।
सा मे क्रियात्प्राणबलं प्रशस्तं हस्तं च मे कार्यपटुं करोतु ॥१७१॥

सन्देहजालं प्रविधूय तेजः सन्दायिनी कृत्तशिराः करोतु ।
बृन्दारकाराधितपादपद्मा वन्दारुमन्दारलता शुभं नः ॥१७२॥

मामाविशन्ती भव वा न वा त्वं सम्पादयेष्टं मम वा न वा त्वम् ।
दुर्ज्ञेयसारे जननि प्रचण्डचण्डि त्वमेका कुलदैवतं नः ॥१७३॥

नाशं विधातुं विषयद्विषां मे पाशत्रयान्मोचयितुं च देहम् ।
शेषाहिवर्ण्ये पदकिङ्कराय भाषस्व योगं जननि प्रचण्डे ॥१७४॥

सर्वात्मशक्तेः पदबन्धुगीताः कुर्वन्तु भूयांसमिह प्रमोदम् ।
युक्तस्य देव्यास्तटितः समाधिमत्तस्य चित्तस्य ममेन्द्रवज्राः ॥१७५॥

## अष्टमो भयहारिस्तबकः

उग्रतरनादां पापहरपादाम् ।
नौमि खलमारीं वज्रधरनारीम् ।।१७६।।

शक्तकरणानां गुप्तभरणानाम् ।
ध्वान्तहरविद्युद्वीचिकिरणानाम् ।।१७७।।

नित्यकरुणानां व्योमशरणानाम् ।
अस्मि गुणवन्दी मातृचरणानाम् ।।१७८।।

काचन शबर्यां देवि मुनिनार्याम् ।
पुण्यवदधीते मोहनकला ते ।।१७९।।

काचिदपि तस्यां मौनिजनगीते ।
कृत्तशिरसीशे भीषणकला ते ।।१८०।।

मञ्जुतरगुञ्जाहारनिकरायै ।
चापशरयुक्तप्रोज्ज्वलकरायै ।।१८१।।

सर्वजनचक्षुस्तर्पणविभायै ।
जङ्गमविचित्रस्वर्णलतिकायै ।।१८२।।

अभ्रचिकुरायै शुभ्रहसितायै ।
मादकमनोज्ञस्वादुवचनायै ।।१८३।।

इन्दुवदनायै कुन्दरदनायै ।
मन्दरकुचायै मन्दगमनायै ।।१८४।।

अञ्जलिरयं मे कञ्जनयनायै ।
मौनिकुलनार्यै पावनशबर्यै ।।१८५।।

पावनचरित्रां मारमणपुत्राम् ।
छिन्नशिरसं तां नौमि मुनिकान्ताम् ।।१८६।।

मातरयि वीर्यत्रातवरधर्मे ।
मास्तु हृदि मोहः सद्गतिरिपुर्मे ।।१८७।।

देवि मुनिचेतो रङ्गलसदूर्मे ।
मास्तु हृदि कामः सुस्थितिरिपुर्मे ।।१८८।।

देवजनभर्तुः प्राणसखि रामे ।
मास्तु हृदि भीतिर्वीर्यदमनी मे ।।१८९।।

व्योमचरि मातर्भामयि विसीमे ।
मास्तु हृदि कोपो बुद्धिदमनो मे ।।१९०।।

साध्ववनलोले देवि बहुलीले ।
अस्तु मम धैर्यं चेतसि सुवीर्यम् ।।१९१।।

सर्वतनुपाकाधायि तव भव्यम् ।
अस्तु वरतेजो नेतृ मम दिव्यम् ।।१९२।।

इच्छति सवित्री यत् प्रियसुताय ।
तद्वितर सर्वं देवि भजकाय ।।१९३।।

इच्छति मनुष्यो यद्रिपुजनाय ।
मत्तदयि दूरे पालय विधाय ।।१९४।।

वर्धयतु तेजो वर्धयतु शक्तिम् ।
वर्धयतु मेऽम्बा वज्रभृतिभक्तिम् ।।१९५।।

वज्रमयि मातर्वज्रधरभक्तः ।
अस्तु तव वीर्यादत्र भुवि शक्तः ।।१९६।।

नश्यतु समस्तो वज्रधरवैरी ।
एतु जयमन्तर्वज्रधरनारी ।।१९७।।

हस्तधृतमुण्डः कश्चन कबन्धः ।
अस्तु मम भिन्नग्रन्थिचयबन्धः ।।१९८।।

साधय मदिष्टं योगमभिधाय ।
देवि विषयारिव्रातदमनाय ।।१९९।।

सम्मदयतान्मे स्वांशकृतशम्बाम् ।
चारुभयहारिच्छन्द इदमम्बाम् ।।२००।।

# तृतीयं शतकम्

## नवमो मदलेखास्तबकः

वन्दे वासवशक्तेः पादाब्जं प्रियभक्तम् ।
प्रातर्भास्कररक्तं पापध्वंसनशक्तम् ॥ २०१॥

हुङ्कारानलकीलादग्धारातिसमूहाम् ।
विद्युद्भासुरवीक्षानिर्धूताश्रितमोहाम् ॥ २०२॥

देवस्त्रीनिटलेन्दुज्योत्स्नालालितपादाम् ।
मेघश्रेण्युपजीव्यश्रोत्राकर्षकनादाम् ॥ २०३॥

दीप्तां भास्करकोटिच्छायायामिव मग्नाम् ।
गात्रालम्बिविनैवक्षौमं किञ्चिदनग्नाम् ॥ २०४॥

कण्ठे कल्पितहारां मुण्डानां शतकेन ।
ज्ञेयामूल्यरहस्यां निर्व्याजं भजकेन ॥ २०५॥

स्वर्गस्य क्षितिपालं पश्यन्तीं प्रणयेन ।
धुन्वानां विबुधानां भीतिं शक्तशयेन ॥ २०६॥

शक्तीनामधिराज्ञीं मायानामधिनाथाम् ।
चण्डां कामपिचण्डीं गायाम्यद्भुतगाथाम् ॥ २०७॥

भित्त्वा मस्तकमेतत् पादाघातबलेन ।
आविश्याखिलकायं खेलत्पावनलीलम् ॥ २०८॥

वेगेनावतरत्ते तेजोनाशितपाशम् ।
चण्डे चण्डि समस्तं गोप्यं भासयतान्मे ।। २०९।।

अन्तः किञ्च बहिस्ते मातर्दारितमस्ते ।
मामावृत्य समन्तात्तेजः कर्म करोतु ।। २१०।।

इन्द्राणीकलया यत्कृत्तामाविशदुग्रा ।
शक्यं वर्णयितुं तद्दृश्यं केन बुधेन ।। २११।।

प्राणापेतशरीराण्यावेष्टुं प्रभवन्तः ।
भेतालास्तव भृत्याश्चण्डे चण्डि चरन्तः ।। २१२।।

छिन्नां सम्प्रविशन्तीवज्रेश्वर्यतिशक्ता ।
निःशेषैरतिभीमैर्भेतालैरभिषिक्ता ।। २१३।।

भेतालाः परमुग्रास्त्वं तेष्वप्यधिकोग्रा ।
तस्मादाहुरयि त्वां चण्डामीश्वरि चण्डीम् ।। २१४।।

आसीद्घातयितुं त्वां साधोर्धीर्जमदग्नेः ।
भेतालप्रभुसर्गायोल्लङ्घ्यैव निसर्गम् ।। २१५।।

आदेष्टाशमवित्तो हन्तासात्त्विकमौलिः ।
वध्या निश्चलसाध्वी शोच्येतश्च कथा का ।। २१६।।

निर्यद्रक्तकणेभ्यः कण्ठात्ते भुवि जाताः ।
मार्याद्यामयवीजीभूतस्तम्बविशेषाः ।। २१७।।

करागारनिवासात्माहिष्मपत्यधिपस्य ।
जाता भार्गवशङ्का हत्यायास्तव मूलम् ।। २१८।।

सत्यं तेऽम्ब चरित्रं भद्मः कोऽपि निगूह्य ।
त्रातुं यादवकीर्तिं मिथ्याहेतुमवादीत् ॥ २१९॥

अन्यागारनिवासे हत्या त्याग उताहो ।
स्त्रीणां चेत्परुषं धिग्भावं पूरुषजातेः ॥ २२०॥

स्वातन्त्र्यं वनितानां त्रातुं मातरधीशे ।
दूरीकर्तुमपारं दैन्यं पञ्चमजातेः ॥ २२१॥

धर्मं व्याजमधर्मं भूलोके परिहर्तुम् ।
वेदार्थे च गभीरे सन्देहानपि हर्तुम् ॥ २२२॥

घोरं वर्णविभेदं कर्तुं च स्मृतिशेषं ।
उल्लासं मतिशक्त्योर्मह्यं देहि महान्तम् ॥ २२३॥

योगं मे विषयारीन् निर्मूलं परिमार्ष्टुम् ।
श्रीमातः कुरु चित्तं कारुण्येन निदेष्टुम् ॥ २२४॥

चण्ड्याश्चण्डतमायाः चित्तं संयममत्तम् ।
भूयः सम्मदयन्तां हैरम्ब्यो मदलेखाः ॥ २२५॥

## दशमः पथ्यावक्त्रस्तबकः

इन्द्राण्याः परमां शक्तिं सर्वभूताधिनायिकाम् ।
प्रचण्डचण्डिकां देवीं छिन्नमस्तां नमाम्यहम् ॥ २२६॥

इन्द्राण्याः शक्तिसारेण प्रादुर्भूते परात्परे ।
प्रचण्डचण्डि वज्रात्मन् वैरोचनि नमोऽस्तु ते ॥ २२७॥

त्वं विश्वधात्रि वृत्रारेः आयुधस्याधिदेवता ।
सर्वप्रचण्डभावानां मध्ये प्रकृतितः परा ॥ २२८॥

सर्वस्मिन्नपि विश्वस्य सर्गेऽनर्गलविक्रमे ।
त्वत्तश्चण्डतमो भावो न भूतो न भविष्यति ॥ २२९॥

तटितः शक्तिसारेण वज्रं निर्मितमायुधम् ।
अभूत्तद्विनयद्देवं तटिदेव निजांशतः ॥ २३०॥

पर्वतश्च पुलोमा च सजलोऽयं घनाघनः ।
पार्वतीति तटिद्देवीं पौलोमीति च तद्विदुः ॥ २३१॥

शैवानां भाषया देवि त्वं तटिद्देवि पार्वती ।
ऐन्द्राणां भाषया मातः पौलोमी त्वमनामये ॥ २३२॥

पूर्वेषां दयितः शब्दो दुर्गेति दुरितापहे ।
प्रचण्डचण्डिकाशब्द उत्तरेषामतिप्रियः ॥ २३३॥

वैष्णवानां गिरा देवि योगमाया त्वमद्भुता ।
वाचा हैरण्यगर्भाणां सवित्रि त्वं सरस्वती ॥ २३४॥

दधाना भुवनं सर्वं व्यापिकापद्विवर्जिता ।
तटिच्छब्दायते व्योम्नि प्राणित्यपि विराजते ॥ २३५॥

प्रचण्डचण्डिका सेयं तटित्सूक्ष्मेण तेजसा ।
विश्वस्मिन्नखिलान्भावान्माताऽनुभवति स्वयम् ॥ २३६॥

भावानामनुभूतानां वाक्यत्वेनावभासनम् ।
भवत्यव्यक्तशब्देऽस्याः सर्वविज्ञानशेवधौ ॥ २३७॥

यदि सा सर्वजगतां प्राणश्चेतश्च शेमुषी ।
प्राणचेतोमनीषाणां तस्याः को नाम संशयः ।। २३८।।

प्राणन्ती चिन्तयन्ती सा राजन्ती च विहायसि ।
तटिच्छब्दायमाना च देवी विजयतेतराम् ।। २३९।।

सेच्छया दधती रूपं मोहनं कीर्त्यते शची ।
प्रचण्डचण्डिका गीता बिभ्राणा भीषणं वपुः ।। २४०।।

पिण्डे कुण्डलिनीशक्तिः सैव ब्रह्माण्डचालिका ।
निद्राति जडदेहेषु योगिदेहेषु खेलति ।। २४१।।

एषा वैरोचनी दुर्गा ज्वलन्ती तपसा परा ।
समुल्लसति यस्यान्तः स जीवन्नेव मुच्यते ।। २४२।।

योगिनो बोधयन्ती मां योगेन नियतव्रताः ।
सर्वार्पकस्य देहे सा स्वयमेव समुल्लसेत् ।। २४३।।

शारीरशक्तिमात्रस्य योगी सञ्चालको भवेत् ।
बाह्यशारीरशक्त्योस्तु योगो नानुग्रहं विना ।। २४४।।

चण्डनारीस्वरूपेण तटिद्रूपेण चाम्बरे ।
पिण्डे कुण्डलिनीतन्वा चरन्ती देवि राजसे ।। २४५।।

मस्तकस्थानमनसो महादेवि विनाशनात् ।
रेणुकायामुतावेशात् कृत्तमस्तेति ते पदम् ।। २४६।।

यदाविशस्त्वमुग्रेऽम्ब रेणुकामुग्रतेजसा ।
तदा पृथङ्महाशक्तिः सा व्यक्तिः समपद्यत ।। २४७।।

व्यक्तीनां दुर्जनघ्नीनां त्वत्तेजोभागजन्मनाम् ।
बहुत्वेपि त्वमेकैव मूलशक्तिः सनातनी ।। २४८।।

उपायमभिधायाम्बा विषयारिविदारणे ।
प्रचण्डचण्डिका देवी विनयत्वङ्घ्रिसेविनम् ।। २४९।।

रमयन्तामुपश्लोकयन्ति यान्ति हृदन्तरम् ।
पथ्यावक्त्राणि पापघ्नीमेतानि च्छिन्नमस्तकाम् ।। २५०।।

## एकादश उपजातिस्तबकः

मेरूपमानस्तनभारतान्तां शक्रस्य लीलासहचारिणीं ताम् ।
हर्तुं समूलं हृदयस्य मोहं प्रचण्डचण्डीमभिवादयेऽहम् ।। २५१।।

वेदादिबीजं जलजाक्षजाया प्राणप्रिया शीतमयूखमौलेः ।
कन्तुर्विधातुर्हृदयाधिनाथा जलं जकारो दहनेन युक्तः ।। २५२।।

तोयं पुनर्द्वादशवर्णयुक्तं त्रयोदशेनाथ युतः कृशानुः ।
तालव्यवर्गप्रथमो नकारः ततश्चतुर्थस्वरसम्प्रयुक्तः ।। २५३।।

एकादशेनाथ युतः समीरः स षष्ठबिन्दुः सरणिः सुराणाम् ।
तदेव बीजं पुनरस्त्रमन्ते कृपीटयोनेर्मनसोऽधिनाथा ।। २५४।।

विद्या त्वियं सप्तदशाक्षराढ्या स्वयं महाकालमुखोपदिष्टा ।
गोप्यासु गोप्या सुकृतैरवाप्या षष्ठीविनुत्या परमेष्ठिनापि ।। २५५।।

स्थाने सहस्त्रच्छदसायकस्य पुनर्यदीशानमनोधिनाथा ।
सर्वार्थदः सप्तदशाक्षरोऽन्यः प्रचण्डचण्डी मनुरुत्तमः स्यात् ।। २५६।।

वेदादिबीजेन विहीनमाद्यं पुनर्भवानीवियुतं द्वितीयम् ।
मन्त्रावुभौ षोडशवर्णयुक्तौ प्रचण्डचण्ड्याः पविनायिकायाः ॥ २५७॥

मन्त्रे तृतीये यदि कूर्चबीजं स्थाने रतेर्जीवितवल्लभस्य ।
मन्त्रोऽपरः षोडशवर्णयुक्तः प्रचण्डचण्ड्याः पटुशक्तिरुक्तः ॥ २५८॥

अयं हरेर्वल्लभया विहीनो मन्त्रोऽपरः पञ्चदशाक्षरः स्यात् ।
क्रोधश्च सम्बोधनमस्त्रमग्नेः सीमन्तिनी चेति धरेन्दुवर्णः ॥ २५९॥

धेनुः कृशानोर्हृदयेश्वरी च प्रचण्डचण्डी मनुरग्निवर्णः ।
एकैव धेनुः सुरराजशक्तेः एकाक्षरः कश्चन मन्त्रराजः ॥ २६०॥

एतेषु तन्त्रप्रणुतेषु भक्तो मन्त्रं नवस्वन्यतमं गृहीत्वा ।
यः संश्रयेताश्रितकामधेनुं प्रचण्डचण्डीं स भवेत् कृतार्थः ॥ २६१॥

वेदादिरम्भोरुहनेत्रजाया मायाङ्कुशब्रह्ममनोधिनाथाः ।
इतीयमव्याजरतिं जपन्तं पञ्चाक्षरी रक्षति रेणुकायाः ॥ २६२॥

ऋष्यादिसङ्कीर्तनमेषु मास्तु कराङ्गविन्यासविधिश्च मास्तु ।
मूर्तिं यथोक्तामुत दिव्यतत्त्वं ध्यात्वा जपेत् सिद्धिरसंशयं स्यात् ॥ २६३॥

नाभिस्थशुक्लाब्जगसूर्यबिम्बे संसक्तरत्यम्बुजबाणपीठे ।
स्थितां पदेनान्यतरेण सम्यगुत्क्षिप्तदीप्तान्यतराङ्घ्रिपद्माम् ॥
२६४॥

दिगम्बरामर्कसहस्रभासमाच्छादितां दीधितिपञ्जरेण ।
कण्ठस्थलीभासुरमुण्डमालां लीलासखीं देवजनाधिपस्य ॥ २६५॥

छिन्नं शिरः कीर्णकचं दधानां करेण कण्ठोद्गतरक्तधाराम् ।

धारात्रये तत्र च मद्यधारां करस्थवक्त्रेण मुदा पिबन्तीम् ।। २६६।।

पार्श्वे सखीं भासुरवर्णिनीं च पार्श्वान्तरे भीषणडाकिनीं च ।
अन्ये पिबन्त्यावसृगम्बुधारे निरीक्षमाणामतिसम्मदेन ।। २६७।।

भयङ्कराहीश्वरबद्धमौलिं ज्वलद्युगान्तानलकीलकेशीम् ।
स्फुरत्प्रभाभासुरविद्युदक्षीं चण्डीं प्रचण्डां विदधीत चित्ते ।। २६८।।

गुञ्जाफलाकल्पितचारुहारा शीर्षे शिखण्डं शिखिनो वहन्ती ।
धनुश्च बाणान्दधती कराभ्यां सा रेणुका वल्कलभृत्विचिन्त्या ।। २६९।।

तटिज्झरीं कामपि सम्प्रश्यन् आकाशतः सर्वतनौ पतन्तीम् ।
मौनेन तिष्ठेद्यमिनां वरिष्ठो यद्येतदम्बास्मरणं प्रशस्तम् ।। २७०।।

दृश्यानशेषानपि वर्जयित्वा दृष्टिं निजां सूक्ष्ममहःस्वरूपाम् ।
निभालयेद्यन्मनसा वरीयानन्योऽयमम्बास्मरणस्य मार्गः ।। २७१।।

विना प्रपत्तिं प्रथमो न सिध्येत् मार्गोऽनयोः केवलभावनातः ।
हृदिस्थले योगबलेन चित्तेर्निष्ठां विना सिध्यति न द्वितीयः ।। २७२।।

आरम्भ एवात्र पथोर्विभेदः फले न भेदो रमणो यथाह ।
स्थितौ धियो हस्तगताप्रपत्तिः प्रपत्तिसिद्धौ सुलभैव निष्ठा ।। २७३।।

उपायमेकं विषयारिनाशविधौ विधायावगतं ममाम्बा ।
कृत्वा समर्थं च निजानुकम्पां प्रचण्डचण्डी प्रथयत्वपाराम् ।। २७४।।

सध्यानमार्गं वरमन्त्रकल्पं प्रचण्डचण्ड्याः परिकीर्तयन्त्यः ।
भवन्तु मोदातिशयाय शक्तेरुपासकानामुपजातयो नः ।। २७५।।

## द्वादशो नाराचिकास्तबकः

वीर्ये जवे च पौरुषे योषाऽपि विश्वतोऽधिका ।
मां पातु विश्वचालिका माता प्रचण्डचण्डिका ॥ २७६॥

शुद्धा चितिः सतः पुरा पश्चान्नभः शरीरका ।
योषातनुस्ततः परं माता प्रचण्डचण्डिका ॥ २७७॥

पारे परात्मनः प्रमा खे शक्तिरुत्तमोत्तमा ।
पिण्डेषु कुण्डलिन्यजा माता प्रचण्डचण्डिका ॥ २७८॥

नाके विलासशेवधिर्नालीकलोचना शची ।
प्राणप्रकृष्टविष्टपे माता प्रचण्डचण्डिका ॥ २७९॥

एकस्य सा महेन्दिरा देवी परस्य कालिका ।
अस्माकमुज्ज्वलानना माता प्रचण्डचण्डिका ॥ २८०॥

राजीवबान्धवो दिवि ह्रादिन्यपारपुष्करे ।
अग्निर्मनुष्यविष्टपे माता प्रचण्डचण्डिका ॥ २८१॥

तेजः समस्तपाचकं चक्षुः समस्तलोककम् ।
चित्तं समस्तचिन्तकं माता प्रचण्डचण्डिका ॥ २८२॥

द्यौस्तेजसां महानिधिः भूमिश्च भूतधारिणी ।
आपश्च सूक्ष्मवीचयो माता प्रचण्डचण्डिका ॥ २८३॥

निर्बाहुकस्य सा करो निर्मस्तकस्य सा मुखम् ।

अन्धस्य सा विलोचनं माता प्रचण्डचण्डिका ।। २८४।।

पाणिं विना करोति सा जानाति मानसं विना ।
चक्षुर्विना च वीक्षते माता प्रचण्डचण्डिका ।। २८५।।

हस्तस्य हस्त उत्तमः चित्तस्य चित्तमद्भुतम् ।
नेत्रस्य नेत्रमायतं माता प्रचण्डचण्डिका ।। २८६।।

सा भारती मनीषिणां सा मानसं महात्मनाम् ।
सा लोचनं प्रजानतां माता प्रचण्डचण्डिका ।। २८७।।

सक्तिः समस्तबाधिका युक्तिः समस्तसाधिका ।
शक्तिः समस्तचालिका माता प्रचण्डचण्डिका ।। २८८।।

छिन्नापि जीवधारिणी भीमापि शान्तिदायिनी ।
योषापि वीर्यवर्धिनी माता प्रचण्डचण्डिका ।। २८९।।

माहेन्द्रशक्तिरुत्तमा सूक्ष्मापि भारवत्तमा ।
शातापि तेजसा तता माता प्रचण्डचण्डिका ।। २९०।।

पुत्रेण कृत्तमस्तकामाविश्य रेणुकातनुम् ।
सा खेलति क्षमातले माता प्रचण्डचण्डिका ।। २९१।।

मामुग्रपापहारिणी सर्वप्रपञ्चधारिणी ।
पायादपायतोऽखिलान् माता प्रचण्डचण्डिका ।। २९२।।

इन्द्रेसुरारिहर्तरि त्रैलोक्यभूमिभर्तरि ।
भक्तिं तनोतु मे परां माता प्रचण्डचण्डिका ।। २९३।।

निष्ठामनन्यचालितां श्रेष्ठां धियं च सर्वगाम् ।
गीता सुरैर्ददातु मे माता प्रचण्डचण्डिका ।। २९४।।

सत्यां गिरं ददातु मे नित्यां करोतु च स्थितिम् ।
धूताखिलाऽघसन्ततिः माता प्रचण्डचण्डिका ।। २९५।।

